This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥हे पोथि दूषेत्वाद् यांकाचि होय॥ श्री राम समर्थ प्र
सिवेराम नटधाम नकराचि होय॥ पत्रे संख्या॥ ६६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ ॥श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ श्रीया
ज्ञवल्क्याय नमः॥ श्रीरामसमर्थ॥ हरिः ॐ मू॥ इषेत्वो र्जेत्वा
वायवस्था॥ देवोवः सविताप्रार्पयतु श्रेष्ठ तमाय कर्मणे॥१॥ आ
प्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्माः॥
मावस्तेन ईशत माघशंꣳसः॥२॥ ध्रुवा अस्मिन् गोपतौ स्या
त बह्वीः॥ यजमानस्य पशून्पाहि वसोः पवित्रमसि॥३॥ द्यौ
रसि पृथिव्यसि मातरिश्वनो घर्मोसि॥ विश्वधाः परमेण
धाम्ना॥४॥ दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत्॥ वसोः प १० ॥१॥

वित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारं॥५॥ देवः
स्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण॥ सुप्वा कामधु
क्षः॥६॥ सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः॥ इंद्रस्य
त्वा भागꣳसोमेना तनच्मि विष्णो हव्यंꣳरक्षस्व॥७॥ अग्ने
व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां॥ इदमह
मनृतात्सत्यमुपैमि॥८॥ कस्त्वा युनक्ति सत्वा युनक्ति कस्मै
त्वा युनक्ति तस्मै त्वा युनक्ति॥ कर्मणे वां वेषाय वां॥९॥ प्रत्यु

॥२॥ ष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः॥
उर्वन्तरिक्षमन्वेमि॥१०॥धूरसि। धूर्व धूर्वन्तं धूर्व तं योस्मां
धूर्वति॥धूर्व तं यं वयं धूर्वामः॥११॥देवानामसि सस्नितमं व
ह्नितमं पप्रितमं जुष्टतमं देवहूतमम्॥अह्रुतमसि हविर्धा
स्ता मी ५ नं दृꣳह स्वमौ ते यज्ञपतिर्ह्वाषीत्॥१२॥विष्णुस्त्वा। क्रमतामु
रु वातायापहतꣳ रक्षो यच्छन्तां पंच॥देवस्य त्वा सवितुः प्रसवे
श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥१३॥अग्नये जुष्टं गृह्णा

म्यग्नीषोमाभ्यां जुष्टं गृह्णामि॥भूताय त्वा नारातये स्वरभि
विख्येषम्॥१४॥दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि॥
पृथिव्या स्त्वा नाभौ सादयाम्यदित्या उपस्थे॥अग्ने हव्यꣳ रक्ष
स्व॥१५॥पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्य
छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥१६॥देवीरापो अग्रेगु
वो अग्रेपुवः॥अग्र इममद्य यज्ञं नयत सुधातुं यज्ञपति
न्देवायुवम्॥१७॥युष्मा इन्द्रोवृणीत वृत्रतूर्ये यूयमिन्द्रमवृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥ णीध्वं वृत्रतूर्ये प्रोक्षिता स्थ ॥ अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषो
माभ्यां त्वा जुष्टं प्रोक्षामि ॥१८॥ दैव्याय कर्मणे शुन्धध्वं देवयज्या
यै ॥ यद्वोऽशुद्धः पराजघानैतद्वस्तच्छुंधामि ॥१९॥ शर्मास्यव
धूतꣳ रक्षोऽवधूता अरातयः ॥ अदित्यास्त्वगसि प्रति त्वादिति
र्वेत्तु ॥२०॥ अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः ॥ प्रति त्वा
दित्यास्त्वग्वेत्तु ॥२१॥ अग्नेस्तनूरसि वाचो विसर्जनम् ॥
देववीतये त्वा गृह्णामि ॥२२॥ बृहद्ग्रावासि वानस्पत्यः स इ

दं देवेभ्यः ॥ हव्यꣳ शमीष्व सुशमि शमीष्व हविष्कृदेहि ॥२३॥ कु
क्कुटोसि मधुजिह्व इषमूर्जमावद ॥ वयꣳ संघातेसंघातेजे
ष्म ॥२४॥ वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु ॥ परापूतꣳ रक्षः
प्रतिपूता अरातयः ॥२५॥ अपहतꣳ रक्षो वायुर्वो विविनक्तु ॥
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ॥२६॥
धृष्टिरसि । स्यपाग्ने अग्निमामादं जहि ॥ निःक्रव्यादꣳ सेधा
देवयजं वह ॥२७॥ ध्रुवमसि पृथिवीं दृꣳह ॥ ब्रह्मवनि त्वा क्षत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥ वनिसजातवन्युपदधामिद्विषतोवधाय ॥२८॥ अग्ने ब्रह्म गृभ्णी
ष्व धरुणमस्यंतरिक्षं दृꣳह ॥ ब्रह्मवनित्वाक्षत्रवनि सजातवन्यु
पदधामिद्विषतोवधाय ॥ धर्त्रमसिदिवं दृꣳह ॥ ब्रह्मवनित्वाक्ष
त्रवनिसजातवन्युपदधामिद्विषतोवधाय ॥२९॥ विश्वाभ्यस्त्वा
शाभ्यउपदधामिद्विषतोवधाय ॥ चितस्थोर्ध्वचितोभृगूणा
मङ्गिरसांतपसातप्यध्वम् ॥३०॥ शर्मास्यवधूतꣳ रक्षोवधू
ताअरातयः ॥ अदित्यास्त्वगसिप्रतित्वादितिर्वेत्तु ॥३१॥

धिषणासिपर्वतीप्रतित्वादित्यास्त्वग्वेत्तु ॥ दिवस्कंभन्यसिधि
षणासिपार्वतेयीप्रतित्वापर्वतीवेत्तु ॥३२॥ धान्यमसिधिनुहि
देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् ॥ धिनुहिमांयज्ञन्यम् ॥
॥३३॥ प्राणायत्वोदानायत्वा व्यानायत्वा ॥ दीर्घामनुप्रसितिमायु
षे धाम् ॥ देवोवःसविताप्रतिगृह्णातु हिण्यपाणि रच्छिद्रेणपा
सिर णा ॥ चक्षुषेत्वामहीनांपयो ॥३४॥ वेदोसिवेदस्येनत्वंदेववेददेवे
भ्योवेदोभवः ॥ तेनमह्यंवेदोभव ॥३५॥ देवस्यत्वासवितुःप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ सवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥संवपामिसमापओषधी
भिःसमोषधयोरसेन॥सꣳरेवतीर्जगतीभिःसंमधुमती
र्मधुमतीभिःपृच्यंताम्॥जनयत्यैत्वासंयौमि॥२१॥इदमग्ने
रिदमग्नीषोमयोरिषेत्वा॥घर्मोसिविश्वायुरुरुप्रथाउरुप्रथ
स्वोरुतेयज्ञपतिःप्रथताम्॥२२॥अग्निष्टेत्वचंमाहिꣳसीदंत
रितꣳरक्षोंतरिताअरातयः॥देवस्त्वासवितावश्रपयतुवर्षिष्ठे
धिनाके॥२३॥माभेर्मासंविक्थाअतमेरुर्यज्ञोतमेरुर्यजमा

नस्यप्रजाभूयात्॥त्रितायत्वाद्वितायत्वैकतायत्वा॥२४॥देवस्यत्वा
सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥आददेध्वरकृतं
देवेभ्यः॥इंद्रस्यबाहुरसिदक्षिणःसहस्रभृष्टिःशततेजाः॥
वायुरसितिग्मतेजाद्विषतोवधः॥२५॥पृथिव्यैवर्मासिपृथि
वीदेवयजन्योषध्यास्तेमूलंमाहिꣳसिषम्॥२६॥व्रजंगच्छगो
ष्ठानंवर्षतुतेद्यौर्बधानदेवसवितःपरमस्यांपृथिव्याꣳशतेनपा
शैः॥योस्मान्द्वेष्टियंचवयंद्विष्मस्तमतोमामौक्॥२७॥अपाररुं
वध्यासंपृथिव्यैदेवयजनात्॥व्रजंगच्छगोष्ठानंवर्षतुतेद्यौर्ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.९॥ धानदेवसवितः परमस्यां पृथिव्यां शतेन पाशैः॥ योस्मान्द्वेष्टि
यंच वयं द्विष्मस्तमतोमामौक्॥ अररो दिवं मापप्तो द्रप्सस्ते द्यां मा
स्कन्॥ व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां
पृथिव्यां शतेन पाशैः॥ योस्मान्द्वेष्टि यंच वयं द्विष्मस्तमतोमामौ
क्॥२६॥ गायत्रेण त्वा छंदसा परिगृह्णामि त्रैष्टुभेन त्वा छंदसा
परिगृह्णामि जागतेन त्वा छंदसा परिगृह्णामि॥ सुक्ष्मा चासि शि
वा चासि स्योना चासि सुषदा चासि॥ ऊर्जस्वती चासि पयस्वती च॥२७॥ ४४॥
ग.१०॥

पुराक्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्॥
यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते॥
द्विषतो वधोसि॥२८॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं
रक्षो निष्टप्ता अरातयः॥ अनिशितोसि सपत्नक्षिद्वाजि
नं त्वा वाजेध्यायै संमार्ज्मि॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो
निष्टप्तं रक्षो निष्टप्ता अरातयः॥ अनिशितासि सपत्नक्षि
द्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि॥२९॥ अदित्यै रास्नासीन्द्राण्यै
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥

सन्नरह नमः॥विष्णो र्वेष्पोस्यूर्जेत्वा दब्धे नत्वा चक्षुषावपश्या
मि॥२८॥अग्नेर्जिह्वासि सुभूर्देवेभ्यः॥धाम्ने धाम्ने भ
व यजुषे यजुषे॥सवितुस्त्वा प्रसवउत्पुनाम्यछिद्रेणपवि
त्रेण सूर्यस्य रश्मिभिः॥सवितुर्वः प्रसव उत्पुनाम्यछिद्रे
मि॰३ णपवित्रेण सूर्यस्य रश्मिभिः॥३१॥तेजोसि शुक्रमस्यमृतम
सिधामनामासि॥प्रियं देवानामनाधृष्टं देवयजनम्॥३२॥
यस्ते॥प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे॥आस्

॥७॥

त्वा नू त्सोमघृत वान्हि भूत्वाग्निं गछ स्वर्यजमानायाविंद॥
॥३०॥७॥ [illegible] ॥४॥दूषेत्वा॥२घोरसि॥२अग्ने व्रतपते॥पवि
त्रेस्थ॥४॥अग्नेस्तनू७धृष्टिरसि६शर्मासि५देवस्यत्वा५दि
तिर्यदेवस्यत्वा२धिषैवमासि५प्रत्युष्टं२रक्षः५इ-तिदशानु
वाकेषु पंचोत्रात्॥५॥प्रथमोध्यायः॥ॐ नमः॥कृष्णोस्याखरे
ष्ठोग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामी॥
बार्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि॥१॥अदित्यै व्युंदनमसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ विष्णो स्तुपोसि॥ ऊर्णम्रदसन्त्वास्तृणामि स्वासस्थां देवेभ्यः॥
२ य ॥२॥ भूपतये स्वाहा भुवनपतये स्वाहा भूतानांपतये स्वाहा॥ गंध
र्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै॥३॥ यजमान
स्य परिधिरस्यग्निरिड ईडितः॥ इन्द्रस्य बाहुरसि दक्षिणो
विश्वस्यारिष्ट्यै॥ यजमानस्य परिधीरस्यग्निरिड ईडि
तः॥ मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्व
स्यारिष्ट्यै॥ यजमानस्य परिधीरस्यग्निरिड ईडितः॥५॥

वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि॥ अग्ने बृहंतमध्वरे॥५॥ समि
दसि सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्यै॥ सवितुर्बाहू स्थः॥६॥
ऊर्णम्रदसं त्वास्तृणामि स्वासस्थं देवेभ्यः॥ आ त्वा वसवो रुद्रा आ
दित्याः सदंतु॥७॥ घृताच्यसि जुहूर्नामसे प्रियेण धाम्ना प्रियेसद
सिसी॥ घृताच्यस्युपभृन्नामसेदं प्रियेण धाम्ना प्रियेसद सिसी
द॥ घृताच्यसि ध्रुवानामसेदं प्रियेण धाम्ना प्रियेसद सिसीद॥ प्रिये
ण धाम्ना प्रियेसद सिसीद॥८॥ ध्रुवा असदन्नृतस्य योनौ ता विष्णो
पाहि॥ पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम्॥९॥ अग्ने वाजजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वाजं त्वा सरिष्यंतं वाजजितꣳ सम्मार्ज्मि ॥ नमो देव
भ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तं ॥१०॥ अस्कन्नमद्याज्यं
देवेभ्यः संभ्रियासं ॥ अंघ्रिणा विष्णो मा त्वावक्रमिषं ॥११॥
॥५॥ वसुमतीमग्ने ते छायामुपस्थेषं विष्णो स्थानमसि ॥ इत
इंद्रो वीर्यमकृणोदूर्ध्वो ध्वर आस्थात ॥१२॥ अग्ने वेर्हो ॥५॥
त्रं वेर्दूत्यं ॥ अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी ॥१३॥
स्विष्टकृद्देवेभ्य इंद्र आज्येन हविषा भूत्स्वाहा ॥ सं ज्यो
तिषा ज्योतिः ॥१४॥ अत्र पितरो मादयध्वं यथाभाग

मावृषायध्वं ॥ अमीमदंत पितरो यथाभागमावृषायिषत ॥१५॥
उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयतां ॥ अग्नीरा
ग्नीध्रात्स्वाहा ॥१६॥ उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वय
तां ॥ अग्निराग्नीध्रात्स्वाहा ॥१७॥ मयीदमिंद्र इंद्रियं दधा
त्वस्मान् रायो मघवानः सचंतां ॥ अस्माकꣳ संत्वाशिषः
सत्या नः संत्वाशिषः ॥ अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं
वाजजितꣳ संमार्ज्मि ॥१८॥ देव सवितरेतं त्वा वृणते बृ
हस्पतिं ब्रह्माणं ॥ तदहं मनसे प्रब्रवीमि ॥१९॥ मनो गा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यच्चै गायत्री त्रिष्टुभे त्रिष्टुप् जगत्यै जगत्यनुष्टुभे ॥ अनुष्टु
प्प्रजापतये प्रजापतिर्विश्वे[illegible]भ्यो देवेभ्यः ॥२०॥ बृहस्प
तिर्देवानां ब्रह्माहं मनुष्याणां ॥ भूर्भुवस्स्वभिरस्तः पाप्मे
॥१०॥ दमहं बृहस्पतेः सदसि सीदामि ॥२१॥ मित्रस्य त्वा चक्षु
षा प्रतीक्षे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां ॥१०॥
पूष्णो हस्ताभ्यां ॥ प्रतिगृह्णामि पृथिव्यास्त्वा नाभौ सा
दयाम्यदित्या उपस्थे ॥२२॥ देवस्य त्वा सवितुः प्रसवे
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददेऽग्नेष्ट्वास्येन

प्राश्नामि बृहस्पतेर्मुखेन ॥ याऽअप्स्वंतर्देवतास्ता इदं
शमयंतु ॥२३॥ स्वाहाकृतं जठरमिंद्रस्य गच्छ ॥ प्रसि
नामे मा संष्टक्रा ऊर्ध्वं मे नाभे सीद ॥२४॥ इंद्रस्य त्वा जठरे
सादयामि ॥ प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान् ॥२५॥
प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे
पाहि ॥ ऊर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमु
त्रामुष्मिंल्लोके इह च ॥२६॥ एषा तेऽग्ने समित्तया
वर्धस्व चा च प्यायस्व ॥ वर्धिषीमहि च वयमा च प्यासि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धीमहि॥२७॥ एतत्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्र
ह्मणे॥ तेन यज्ञमव तेन यज्ञपतिं तेन मामव॥२८॥ मनो
ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु॥ अरि
रा१२॥ ष्टं यज्ञꣳ समिमं दधातु विश्वे देवाँ इह मादयेतामोम्प्रति स४
ष्ठा॥२९॥ अग्नीषोमयोरुज्जितिमनुज्जेषं वाजस्य मा ॥१२॥
प्रसवेन प्रोहामि॥ अग्नीषोमौ तमपनुदतां योस्मान्द्वेष्टि
जर यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि॥ इंद्राग्न्योरु
ज्जितिमनुज्जेषं वाजस्य मा प्रसवेन प्रोहामि॥ इंद्रा
स२

ग्नी तमपनुदतां योस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापो
हामि॥३०॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा॥ संजानाथां द्या
वापृथिवी मित्रावरुणौ त्वा वृष्ट्यावतां व्यंतु वयो रिप्तो रिहाणाम
रुतां पृषतीर्गच्छ॥ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमाव ॥३१॥
ह॥३२॥ चक्षुष्पा असि चक्षुर्मे पाहि॥ यं परिधिं पर्यधत्था अग्ने
देव पणिभिर्गुह्यमानः॥३३॥ तं त एतमनु जोषं भराम्येष नेत्व
दपचेतयातै॥ अग्नेः प्रियं पाथोपीतं॥३४॥ संस्रवभागा स्थे

षाबृहंतःप्रस्तरेष्ठाःपरिध्यश्चदेवाः॥इमांवाचमभिविश्वेगृणं
तआसद्यास्मिन्बर्हिषिमादयध्वꣳस्वाहावाट्॥घृताचीस्थोधुर्यौ
पातꣳसुम्नेस्थसुम्नेमाधत्तं॥२५॥अग्नेदब्धायोशीतमपाहिमादि
द्योःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्यै॥अविषंनःपितुंकृ
॥१२॥ णुसुषदायोनौस्वाहावाट्॥२६॥अग्नयेसंवेशपतयेस्वाहास
रस्वत्यैयशोभगिन्यैस्वाहा॥उलूखलेमुसलेयच्चशूर्पेआशि ॥१२॥
श्लेषदृषदियत्कपाले॥२७॥उत्लुषोविप्रुषःसंजंतुहोमिसस्याःसं
लुयजमानस्यकामास्वाहा॥आप्यायतांध्रुवाहविषाघृतेनै

यज्ञंयज्ञंप्रतिदेवयद्भ्यः॥सूर्यायाउधोअदित्याउपस्थ उरुधारापृ
थिवीयज्ञेअस्मिन्॥२८॥देवागातुविदोगातुंवित्वागातुमित॥
मनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाः॥२९॥संबर्हिरंक्तांहृ
विषाघृतेनसमादित्यैर्वसुभिःसंमरुद्भिः॥समिंद्रोविश्वदेवेभि
रंक्तांदिव्यंनभोगच्छतुयत्स्वाहा॥३०॥कस्त्वाविमुंचतिसत्वावि
मुंचतिकस्मैत्वाविमुंचतितस्मैत्वाविमुंचति॥पोषायरक्षसांभा
गोसि॥३१॥वेषोस्तुपवेषोद्विषतोग्रीवाउपवेविष्टि॥वेशांत्वाग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुभगा व्यारयेह ॥ ४२ ॥ रुद्राः कर्मण्या अनेपाइन्नोयथासन्नू ।
ष्टु होमित्वा सुभगलोभगाय पुरूतमं पुरूहूतस्त्र वस्यन् ॥ ४३ ॥
संवर्चसा पयसा संतनूभिरगंन्महि मनसासंशिवेन ॥ त्व
॥१३॥ ष्टा सुदत्रो विदध्यातु रायोनुमार्ष्टु तन्वो यद्विलिष्टं ॥ ४४ ॥ यज्ञ
स्यं चतउपचा ॥ शिवे मे संतिष्ठस्वारिष्टे मे संतिष्ठस्वाभिष्टे मे
संतिष्ठस्व ॥ ४५ ॥ दिवि विष्णुर्व्यक्रंस्त जागतेन छंदसा ततो ॥१३॥
निर्भक्तः ॥ योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ अंतरिक्षे विष्णुर्व्यक्र

ंस्त त्रैष्टुभेन छंदसा ततो निर्भक्तः ॥ योस्मान्द्वेष्टि यं च वयं द्वि
ष्मः ॥ पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण छंदसा ततो निर्भ
क्तः ॥ योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ ४६ ॥ अस्मादन्नादस्यै प्र
तिष्ठाया अगंन्म स्वः ॥ संज्योतिषाभूम ॥ ४७ ॥ स्वयंभूरसि
श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि ॥ सूर्यस्यावृतम
न्वावर्ते ॥ ४८ ॥ अग्ने गृहपते सुगृहपतिरहं त्वयाग्ने गृहपतिना
भूयासं ॥ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः ॥ ४९ ॥ अस्थू

रिणौगार्हपत्यानिसंतुशतꣳहिमाः॥तिग्मेननस्तेजसा
संꣳशिशाधिसूर्यस्यावृतमन्वावर्त्ते॥५०॥उरुविष्णो
विक्रमस्वोरुक्षयायनस्कृधि॥घृतंघृतयोनेपिब
॥१४॥ प्रप्रयज्ञपतिंतिर॥५१॥ततोसितेतुरस्यनुमातनु
हि५अस्मिन्न्यज्ञेस्याꣳसाधुरुस्यायामस्मिन्नंन्ते ॥१४॥
स्मिंल्लोके॥५२॥इदंमेकर्मेदंवीर्यंपुत्रोनुसंतनोतु॥

अग्नेव्रतपतेव्रतमचारिषंतदशकंतन्मेराधि॥इ
दमहंयएवास्मिसएवास्मि॥५३॥अग्नयेकव्यवा
हनायस्वाहासोमायपितृमतेस्वाहा॥अपहता
असुरारक्षाꣳसिवेदिषदः॥५४॥येरूपाणिप्र
तिमुंचमानाअसुरासंतःस्वधयाचरंति॥परा
पुरोनिपुरोयेभरंत्यग्निष्टांल्लोकात्प्रणुदात्यस्मात्॥५५॥
अत्रपितरोमादयध्वंयथाभागमावृषायध्वं॥अमीम

दंतपिरो यथाभागमावृषाइषत ॥५५ नमो वः पितरः सुषा
य नमो वः पितरस्तपसे ॥ नमो वः पितरो यज्जीवं तस्मै नमो वः
पितरो रसाय ॥ नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः ॥
एतद्वः पितरो वासो गृहान्नः पितरो दत्त ५७ ॥ उदा सुषा स्वायुषो
॥१५॥ सर्जेन्य स्वधा मक्षितः ॥ उदस्थाम मृतां अनु ॥५५८॥ आधत्त पित
रो गर्भं कुमारं पुष्करस्रजं ॥ यथेह पुरुषासत् ॥५७॥ ऊर्जं वहंतीर ॥१५॥
मृतं घृतं पयः कीलालं परिस्रुतं ॥ स्वधा स्थ तर्पयत मे पितॄन् ५७ ॥
रक्षोसि ७ अग्ने वाजजित् ७ देवस्य सवितर ११ अग्निषोमयो ९ अग्नेरदब्धायो ८
संवर्चसा १० अग्नये कव्यवाहनाय ७ इति सप्तौवाकेष्टिः ॥ द्वितीयोऽध्यायः ॥

हरिः ॐ ॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिं ॥ आस्मि
न्हव्या जुहोतन ॥१॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ॥
अग्नये जातवेदसे ॥२॥ तं त्वा समिद्भिरंगिरो घृतेन वर्द्धयामसि ॥
बृहच्छोचा यविष्ठ्या ॥३॥ उप त्वाग्ने हविष्मतीर्घृताचीर्यंतु ह
र्यत ॥ जुषस्व समिधो मम ॥४॥ भूर्भुवः स्वर्द्यौरिव भूम्ना पृथि
वीव वरिम्णा ॥ तस्यास्ते पृथिवि देवयजनि पृष्ठेग्निमन्नादमन्नाद्या
यादधे ॥५॥ आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः ॥ पितरं च
प्रयंत्स्वः ॥६॥ अंतश्चरति रोचनास्य प्राणादपानती ॥ व्यख्य
न्महिषो दिवं ॥७॥ त्रिंशद्धाम विराजति वाक्पतंगाय धीयते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतिवस्तोरहद्युभिः॥८॥अग्निज्योतिषंत्वावायुमतींप्राणवतीं॥
स्वर्ग्यांꣳस्वर्गायोपदध्यामिभास्वतीं॥अग्निर्ज्योतिर्ज्योतिर
ग्निः स्वाहा॥९॥सूर्यंज्योतिषंत्वावायुमतींप्राणवतीं॥स्वर्ग्यां
॥१९। ꣳस्वर्गायोपदध्यामिभास्वतीं॥सूर्योज्योतिर्ज्योतिःसूर्यःस्वा
हा॥१०॥सजूर्देवेनसवित्रासजूरात्र्येंद्रवत्या॥जुषाणोअ ॥१९॥
ग्निर्वेतुःस्वाहा॥११॥सजूर्देवेनसवित्रासजूरुषसेंद्रवत्या॥
जुषाणःसूर्योवेतुःस्वाहा॥१२॥इहपुष्टिंपुष्टिपतिर्दध्यादिह
प्रजाꣳरमयतुप्रजापतिः॥अग्नयेगृहपतयेरयिमते

पुष्टिपतयेस्वाहा॥अग्नयेन्नादायान्नपतयेस्वाहा॥१३॥अनमि
त्रंमेअधरागनमित्रमुदग्दधि॥इन्द्रानमित्रंपश्चान्नमनमि
त्रंपुरस्कृधि॥१४॥इन्द्रःपश्चादिंद्रपुरस्तादिंद्रोअस्मांऽअभि
पातुविश्वतः॥इंद्रोजिष्याꣳसतांमनाꣳसिविषूचीनाव्य
तू स्यताम्॥१५॥समिदसिसमिद्धोमेअग्नेदीदिहि॥समेद्धाते
अग्नेदीद्यासं॥१६॥उपप्रयंतोअध्वरंमंत्रंवोचेमाग्नये॥
आरेअस्मेचशृण्वते॥१७॥अग्निर्मूर्द्धादिवःककुत्पतिःपृथि
व्याअयं॥अपाꣳरेताꣳसिजिन्वति॥१८॥उभावामिंद्राग्नीऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आहुवध्याउभाराध्यसःसुहमादृयध्यै॥उभादाताराइषाँरयीणा
मुभावाजस्यसातयेहुवेवां॥१९॥अयंतेयोनिर्ऋत्वियोयतोजा
तोअरोचथाः॥तंजानंनग्नआरोहा।थानोवर्धयारयिं॥२०॥
॥१७॥ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः॥
यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे॥२१॥ ॥१७॥
अस्यप्रत्नामनुद्युतंँशुक्रंदुदुह्रेअह्रयः॥पयःसहस्रसामृ वि ५
षिं॥२२॥तनूपाअग्नेसितन्वंमेपाह्यायुर्दाअग्नेस्यायुर्मेदे
हि॥वर्चोदाअग्नेसिवर्चोमेदेहि॥२३॥अग्नेयन्मेतन्वाऊनंत

न्मआपृण॥इंधानास्त्वाशतँहिमाद्युमंतँसमिधीमहि॥२४॥
वयस्वंतोवयस्कृतँसहस्वंतःसहस्कृतं॥अग्नेसपत्नदंभ
नमदब्धासोअदाभ्यं॥२५॥चित्रावसोस्वस्तितेपारमशीय॥
संत्वमग्नेसूर्यस्यवर्चसागथाःसमृषीणाँस्तुतेन॥२६॥
संप्रियेणधाम्नासमहमायुषासंवर्चसासंप्रजयासँरा
यस्पोषेणग्मिषीय॥अंधस्थांधोवोभक्षीयमहस्थमहो जप५+
वोभक्षीय॥२७॥ऊर्जस्थोर्जंवोभक्षीयरायस्पोषस्थराय
स्पोषंवोभक्षीय॥रेवतीरमध्वमस्मिन्योनावस्मिन्गो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठस्मिन्नक्षत्रेस्मिंल्लोके।।२८।।इहैवस्तंतामापगात।।संहिता
सिविश्वरूप्यूर्जामाविशगौपत्येन।।२९।।उपत्वाग्नेदिवेदिव
दोषावस्तर्धियावयं।।नमोभरंतएमसि।।३०।।राजंतमध्वरा
।।१८।। णांगोपामृतस्यदीदिविं।।वर्द्धमानंस्वेदमे।।३१।।सनःपिते
वसूनवेग्नेसूपायनोभव।।सचस्वानःस्वस्तये।।३२।।अग्ने
त्वन्नोअंतमउतत्राताशिवोभवावरूथ्यः।।वसुरग्निर्व ।।१८।।
सुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः।।३३।।तंत्वाशोचि
ष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः।।सनोबोधिश्रु

धीहवमुरुष्याणोअ[illegible]घायतसमस्मात्।।३४।।इडएह्यदितए
हिकाम्यएहि।।मयिवःकामधरणंभूयात्।।३५।।सोमानंस्वर
णंकृणुहिब्रह्मणस्पते।।कक्षीवंतंयऔशिजः।।३६।।योरेवान्यो
अमीवहावसुवित्पुष्टिवर्द्धनः।।सनःसिषक्तुयस्तुरः।।३७।।
मानःशंसोअररुषोधूर्तिःप्रणङ्मर्त्यस्य।।रक्षाणोब्रह्मणस्प
ते।।३८।।महित्रीणामवोस्तुद्युक्षंमित्रस्यार्यम्णः।।दुराधर्षंव
रुणस्य।।३९।।नहितेषाममाचननाध्वसुवारणेषु।।ईशेरिपु
रघशंसः।।४०।।तेहिपुत्रासोअदितेःप्रजीवसेमर्त्याय।।ज्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिर्यक्छ्रेत्य जस्रं॥३॥ कूकः दाच नस्तरीरसि नेंद्र सख्य सिदाषे॥
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥४॥ तत्स
वितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥
॥१७॥ परि ते दूडभो रथोस्माँऽअश्नोतु विश्वतः॥ येन रक्षसि दाशुषः॥५॥
समिद्धो भास मर्ध्ये य प्रजा या चु प्यनेन च॥६॥ भूर्भुवः स्वः॥
सुप्रजाः प्रजया भूयासं॥ सुवीरो वीरैः सुपोषः पोषैः॥७॥ ॥१७॥
नर्य प्रजां मे पाहि शंस्य पशून्मे पाहि॥ आगन्म विश्ववे
दसमस्मभ्यं वसुवित्तमं॥८॥ अग्ने सम्राडभि द्युम्न

मभि सह आयच्छस्व॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजा
वान् वसुवित्तमः॥९॥ अग्ने गृहपतेऽभि द्युम्नमभि सह
आयच्छस्व॥ गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एम
सि॥१०॥ ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मो
दमानः॥ येषामध्येति प्रवसन्येषु सौमनसो बहुः॥११॥
गृहानुपह्वयामहे ते नो जानन्तु जानतः॥ उपहूता इह गाव
उपहूता अजावयः॥१२॥ अथो अन्नस्य कीलाल उपहूतो
गृहेषु णः॥ क्षेमाय वः शान्त्यै प्रपद्ये॥ शिवं शग्मं शंयोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो: शंयोः॥५१॥प्रघासिनो हवामहे मरुतश्च रिशादसः।
करंभेण सजोषसः॥५२॥यद्ग्रामे यदरण्ये यत्सभायां यदिंद्रि
ये॥यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा॥५३॥मो
षूण इंद्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः॥महश्चि
॥२०॥ द्यस्य मीढुषो यव्या हविष्मतो मरुतो वंदते गीः॥५४॥अक्र
न्कर्म कर्मकृतः सह वाचा मयोभुवा॥देवेभ्यः कर्म कृत्वास्तं प्रेत सचा ॥२०॥
भुवः॥५५॥अवभृथ निचुंपुण निचेरुरसि निचुंपुणः॥अव
देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पा

हि॥५६॥पूर्णा दर्वि परा पत सुपूर्णा पुनरापत॥वस्नेव विक्रीणा
वहा इषमूर्जं शतक्रतो॥५७॥देहि मे ददामि ते नि मे धेहि नि
ते दधे॥निहारं च हरासि मे निहारं नि हराणि ते स्वाहा॥५८॥
अक्षन्नमीमदंत ह्यव प्रिया अधूषत॥अस्तोषत स्वभानवो विप्रा न
विष्ठया मती योजान्विंद्र ते हरी॥५९॥सुसंदृशं त्वा वयं मघवन्वं
दिषीमहि॥प्र नूनं पूर्णबंधुरस्तुतो यासि वशाँ अनु योजान्विंद्र
ते हरी॥६०॥मनो न्वाहुवामहे नाराशंसेन सोमेन॥पितॄणां च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्मभिः॥५१॥ आनएतुमनः पुनः क्रत्वेदक्षायजीवसे॥ ज्योक्च सूर्यंन्दृ
शे॥५२॥ पुनर्नः पितरोमनोददातुदैव्योजनः॥ जीवंव्रातंसचेम
हि॥५३॥ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः॥ प्रजावंतःसचे
॥२१॥ महि॥५४॥ एषतेरुद्रभागः [illegible] सहस्वस्रांबिकयातंजुषस्वस्वाहा॥
एषतेरुद्रभागआखुस्तेपशुः॥५५॥ अवरुद्रमदीमह्यवदेवंत्र्यं ॥२१॥
बकम्॥ यथानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्य
वसाययात्॥५६॥ भेषजमसिभेषजंगवेश्वायपुरुषायभेषजम्॥

सुगंमेषायमेष्यै॥५७॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम्॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥५८॥ त्र्यंबकं
यजामहेसुगंधिंपतिवेदनम्॥ उर्वारुकमिवबंधनादितोमुक्षी
यमामुतः॥५९॥ एतत्तेरुद्रावसंतेनपरोमूजवतोतीहि॥ अवततधन्वा
पिनाकावसःकृत्तिवासाअहिंसन्नःशिवःशांतोतीहि॥६०॥
वाजिनांवाजोवतुनक्षौअस्मान्रेतःसिंचमंमत्तंबलाय॥ वि
श्वेदेवाअजिवैयसंबभुवुःस्तन्माधिनोतुप्रजयाधनेन॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाज्य हं वाजिन स्योपहूत उपहूत स्य भक्षयामि ।। वाजो वाजी भूया
सम् ।।७२।। सुवित्रा प्रसूता दैव्य आप उदं तु ते तनूम् ।। दी[illegible]र्घायुत्वा
यव[illegible]र्चसे ।।७३।। कश्यपस्य त्र्यायुषं जमदग्ने स्त्र्यायुषम् ।।
।२२७ यद्देवानां त्र्यायुषं तन्मे अस्तु त्रियायुषम् ।।७४।। येन धाता बृह
स्पतेरिंद्रस्य चायुषे वपत ।। तेन ते वपामि ब्रह्मणा जीवातवे जीव ।।२२८
नाय ।।७५।। दीर्घायुत्वाय बलाय वर्चसे ।। सुप्रजास्त्वाय चास्मा ऽ
अथो जीवः शरदः शतम् ।।७६।। [illegible] ।। समिधाग्निं ऽ अग्निज्योतिषेत्वा चा[illegible] ऽ

।। हरिः ॐ ।। इदमगन्म देवयजनं पृथिव्या यत्र देवासो ऽ अजुषन्त
विश्वे ।। ऋक्सामाभ्यां ँ संतरंतो यजुर्भी रायस्पोषेण समिषा मदे
म ।।१।। इमा ऽ आपः शमु मे संतु देवी रोषधे त्रायस्व स्वधिते मैनं ँ हिं ँ स्व ३
सीः ।। आपो ऽ अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु ।।२।।
विश्वं ँ हि रिप्रं प्रवहंति देवी रुदिदाभ्यः शुचिरा पूत ऽ एमि ।। दीक्षा रा ३
तपसोस्तनूरसि तां त्वा शिवां ँ शग्मां परिदधे भद्रं वर्णं पुष्यन् ।।३।।
महीनां पयोसि वर्चोदा ऽ असि वर्चो मे देहि ।। वृत्रस्य कनीनकास्सि च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुर्दा असि चक्षुर्मे देहि॥४॥ चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो
मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ तस्य ते पवि
त्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥५॥ आ वो देवास ईम
।१२ ॥२३॥ हे वामं प्रयत्यध्वरे॥ आ वो देवास आशिषो यज्ञियासो हवामहे॥
॥६॥ स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् स्वाहा द्यावापृथिवी ॥२३॥
भ्याᳬं स्वाहा वातादारभे॥७॥ आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै म
नसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहा॥

आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उरो अन्तरिक्ष॥ बृहस्पतये
हविषा विधेम स्वाहा॥८॥ विश्वो देवस्य नेतुर्मर्त्तो वुरीत सख्यम्॥ विश्वो
राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा॥९॥ ऋक्सामयोः शिल्पे स्थ
स्ते वामारभे ते मा पातम्॥ आस्य यज्ञस्योदृचः॥१०॥ शर्मासि शर्म मे
यच्छ नमस्ते अस्तु मा मा हिᳬंसीः॥ ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे
यच्छ॥११॥ सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्य।
इन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि॥१२॥ उच्छ्रयस्व वनस्पत ऊर्ध्वो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥

मापाह्यँ२हसः॥ आस्यै[illegible] अस्याहं चः॥१२॥ व्रतं कृणुत व्रतं कृणुत
व्रतं कृणुत॥ अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः॥१४॥ दैवीं धि
यं मनामहे सुमृडीकामभिष्टये॥ वर्चोधां यज्ञवाहसं सुतीर्था
नो असद्वशे॥१५॥ ये देवा मनोजाता मनोयुजो दक्षक्रतवः॥ ते नोऽवं
तु ते नः पान्तु तेभ्यः स्वाहा॥१६॥ श्वात्राः पीता भवत यूयमापो अस्माकं
तरुदरे सुशेवाः॥ ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदं
तु देवीरमृता ऋतावृधः॥१७॥ इयं ते यज्ञिया तनूरपो मुञ्चामि न प्र ॥२४॥

जाम्॥ अंहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या संभव॥१८॥
अग्ने त्वं सु जागृहि वयं सु मन्दिषीमहि॥ रक्षा णो अप्रयुच्छं
न्प्रबुधे नः पुनस्कृधि॥१९॥ पुनर्मनः पुनरायुर्म आगात्पुन
श्चक्षुः पुनः श्रोत्रं म आगात्॥ पुनः प्राणः पुनरात्मा म आगाद्वैश्वा त्
नरो अदब्धस्तनूपा अग्निर्मा पातु दुरितादवद्यात्॥२०॥ त्वम
ग्ने व्रतपा असि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥२१॥ रास्वेयत्सो
माभूयो भर॥ देवो नः सविता वसोर्दाता वस्वदात्॥२२॥ एषा ते
शुक्र तनूरेतद्वर्चस्तया संभव भ्राजं गच्छ॥ जूरसि धृता म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नक्षत्राणुष्मावि॒षके॒वे॥२३॥तस्यास्ते सत्यसवसः प्रसवेतनूयंत्रमशीय स्वाहा॥ शुक्रमसिचंद्रमस्यमृतमसिवैश्वदेवमसि॥२४॥चिदसि मनासिधीरसिदक्षिणासिक्षत्रियासियज्ञियास्यदितिरस्युभ
॥२५॥ यतःशीर्ष्णी॥सानःसुप्राचीसुप्रतीच्येधि॥२५॥मित्रस्त्वापदिब ध्नीतांपूषाध्वनस्पात्विंद्रायाध्यक्षाय॥अनुत्वामातामन्यताम ॥२५॥
नुपितानुभ्रातासगर्भ्योनुसखासयूथ्यः॥२६॥सादेविदेवम च्छेहीन्द्रायसोमं॥रुद्रस्त्वावर्तयतुस्वस्तिसोमसखापुनरेहि॥२७॥ वस्व्यस्यदितिरस्यादित्यासिरुद्रासिचंद्रासि॥बृहस्पतिष्ट्वासु

म्नेरम्णातुरुद्रोवसुभिराचके॥२८॥अदित्यास्त्वामूर्धन्नाजिघर्मि देवयजनेपृथिव्याः॥इडायास्पदमसिघृतवत्स्वाहा॥२९॥अस्मे रमस्वास्मेतेबंधुः॥त्वेरायोमेरायः॥३०॥मावयंरायस्पो षेणवियौष्मतोतोरायः॥समख्येदेव्याधियासंदक्षिणयोरु चक्षसा॥मामआयुःप्रमोषीर्मोअहंतववीरंविदेयतवदेविसं दृशि॥३१॥एषतेगायत्रोभागइतिमेसोमायब्रूतादेषतेत्रैष्टुभोभा गइतिमेसोमायब्रूतात्॥एषतेजागतोभागइतिमेसोमायब्रूता च्छंदोमानानांसाम्राज्यंगच्छतादितिमेसोमायब्रूतात्॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्माकोसिशुक्रस्तेग्रह्यः॥विचिंचितस्त्वाविचिन्वंतु॥२३॥अभि
त्यंदेवं सवितारमोण्योः कविक्रतुमर्चामिसत्यसवं रत्नधाम
भिप्रियं मतिंकविम्॥ऊर्ध्वायस्यामतिर्भा अदिद्युतत्सवीमनि
॥२६॥ हिरण्यपाणिरमिमीतसुक्रतुः कृपा स्वः॥२४॥प्रजाभ्यस्त्वा प्रजा
स्त्वानुप्राणंतु॥प्रजास्त्वमनुप्राणिहि॥२५॥चंद्रंत्वा चंद्रेण क्रीणामि ॥२६॥
शुक्रं शुक्रेणामृतममृतेन॥सग्मेते गोरस्मेते चंद्राणि॥
तपसस्तनूरसिप्रजापतेर्वर्णः॥परमेण पशुना क्रीयसे सहस्रपो
षंपुषेयम्॥२६॥मित्रोन एहि सुमित्रधः इंद्रस्योरुमाविश दक्षि

णमुशन्नुशंतं स्योनः स्योनम्॥२७॥स्वान भ्राजांघारे बंभा
रेहस्तसुहस्तकृशानो एते वः सोमक्रयणास्तान्रक्षध्वंमा
वोदभन्॥२८॥परिमाग्नेदुश्चरिताद्बाधस्वामासुचरिते भज॥
उदायुषा स्वायुषोदस्थाममृतां ऽ अनु॥प्रतिपंथामपद्महि स्व
स्तिगामनेहसम्॥येनविश्वाः परिद्विषोवृणक्तिविंदतेवसु॥२९॥
अदित्यास्त्वगस्यदित्यै सद आसीद॥अस्तभ्नाद्यामृषभो अंत
रिक्षममिमीतवरिमाणं पृथिव्याः॥आसीदद्विश्वा भुवनानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्र १ संम्राड्विश्वेत्तानिवरुणस्यतानि॥ ३१॥ वनेषुव्यंतरिक्षंततान
वाजमर्वत्सुपयउस्त्रियासु॥ हृत्सुक्रतुंवरुणोविक्ष्वग्निं
॥२७॥ दिविसूर्यमदधात्सोममद्रौ॥ ३२॥ सूर्यस्यचक्षुरारोहाग्नेरक्ष ॥२७॥
णःकनीनकाम्॥ यत्रैतशेभिरीयसेभ्राजमानोविपश्चिता॥ ३३॥
उस्राऽएतंधूर्षाहौयुज्येथामनश्रूअवीरहणौब्रह्मचोदनौ॥
स्वस्तियजमानस्यगृहान्गछतम्॥ ३४॥ भद्रोमेसिप्रच्य
वस्वभुवस्पतेविश्वान्यभिधामानि॥ मात्वापरिपरिणोविदन्मा

त्वापरिपंथिनोविदन्मात्वावृकाअघायवोविदन्॥ श्येनोभूत्वापरा
पतयजमानस्यगृहान्गछतन्नौसंस्कृतम्॥ ३५॥ नमोमित्रस्य
वरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत॥ दूरेदृशेदेवजाताय
केतवेदिवस्पुत्रायसूर्यायशंसत॥ ३६॥ वरुणस्योत्तंभनमसिव
रुणस्यस्कंभसर्जनीस्थः॥ वरुणस्यऋतसदन्यसिवरुणस्यऋ
तसदनमसिवरुणस्यऋतसदनमासीद॥ ३७॥ यातेधामानिहविषा
यजंतितातेविश्वापरिभूरस्तुयज्ञम्॥ गयस्फानःप्रतरणःसुवीरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८॥ वीर हा प्र च रा सो म दुर्यो न ॥ ४९ ॥ छ ॥ ॥२८

हरिः ॐ प्र ॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वा ॥
अतिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्न
ये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥ अग्नेर्जनित्रमसि वृषणौ स्थः ॥
उर्वश्यस्यायुरसि पुरूरवा असि ॥ गायत्रेण त्वा छन्दसा मन्थामि त्रै
ष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि ॥२॥ भवतं नः
समनसौ सचेतसावरेपसौ ॥ मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जा
तवेदसौ शिवौ भवतमद्य नः ॥३॥ अग्नावग्निश्चरति प्रविष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषीणांपुत्रोऽअभिशस्तिपावा॥सनःस्योनःसुयजायदेवेभ्योहव्यꣳ जेह
सदमप्रयुच्छन्स्वाहा॥४॥ आपतयेत्वागृह्णामिपरिपतयेत्वागृह्णा
मि॥तनूनप्त्रेशाक्वरायशक्वरऽओजिष्ठाय॥५॥अनाधृष्टमस्यना
॥२९॥ धृष्यंदेवानामोजः॥अनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यम्॥६॥ ॥२९॥
अंजसासत्यमुपगेषꣳस्वितेमाधाः॥अग्नेव्रतपास्त्वेव्रतपाः॥७॥या
तवतनूरियꣳसामयियाममतनूरेषासात्वयि॥सहनौव्रतपतेव्रतान्य
नुमेदीक्षांदीक्षापतिर्मन्यतामनुतपस्तपस्पतिः॥८॥अꣳशुरꣳशुष्टेदे
वसोमाप्यायतामिन्द्रायैकधनविदे॥आतुभ्यमिन्द्रःप्यायतामात्वमिन्द्रायप्या यस्व

यस्व॥९॥आप्याययास्मान्सखीन्सन्यामेधया॥स्वस्तितेदेवसोमसु
त्यामुदृचमशीय॥१०॥एष्टारायःप्रेषेभगाय॥ऋतमृतवादिभ्योन
मोद्दिवेनमःपृथिव्यै॥११॥यातेअग्नेयःशयातनूर्वर्षिष्ठागह्वरे
ष्ठा॥उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वाहा॥यातेअग्नेर
जःशयातनूर्वर्षिष्ठागह्वरेष्ठा॥उग्रंवचोऽअपावधीत्त्वेषंवचोऽअपाव
धीत्स्वाहा॥यातेअग्नेहरिशयातनूर्वर्षिष्ठागह्वरेष्ठा॥उग्रंव
चोऽअपावधीत्त्वेषंवचोऽअपावधीत्स्वाहा॥१२॥तप्तायनीमेसिवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तायनीमेसि॥अवतान्माव्यथितमवतान्माव्यथितम्॥विदेग्नेनं
भोनामाग्नेअंगिर आयुनानाम्नेहि॥योस्यांपृथिव्यामसियत्तेना
धृष्टंनामयज्ञियंतेनत्वादधे॥विदेग्नेनंभोनामाग्नेअंगिर
॥२०॥ आयुनानाम्नेहि॥योद्वितीस्यांपृथिव्यामसियत्तेनाधृष्टंनाम
यज्ञियंतेनत्वादधे॥विदेग्नेनंभोनामाग्नेअंगिरयुनानाम्ने ॥२०॥ आप
हि॥यस्तृतीयस्यांपृथिव्यामसियत्तेनाधृष्टंनामयज्ञियंतेनत्वा
दधे॥अनुत्वादेववीतयेसिंहीरसिसपत्नसाहीदेवेभ्यःकल्पस्वसिं
हीरसिसपत्नसाहीदेवेभ्यःशुंधस्वसिंहीरसिसपत्नसाहीदेवेभ्यः

शुंभस्व॥१३॥इंद्रघोषस्त्वावसुभिःपुरस्तात्पातुप्रचेतास्त्वारु
द्रैःपश्चात्पातु॥मनोजवास्त्वापितृभिर्दक्षिणतःपातुविश्व
कर्मात्वादित्यैरुत्तरतःपातु॥१४॥इदमहंतप्तंवार्बहिर्धायज्ञा
न्निःसृजामि॥सिंहीरसिस्वाहासिंहीरस्यादित्यवनिःस्वाहा॥१५॥
सिंहीरसिब्रह्मवनिःक्षत्रवनिःस्वाहासिंहीरसिसुप्रजावनी
रायस्पोषवनिःस्वाहा॥सिंहीरस्यावहदेवान्यजमानायस्वाहा
भूतेभ्यस्त्वा॥१६॥ध्रुवोसिपृथिवींदृंहध्रुवक्षिदस्यंतरिक्षंदृं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽहा॥ अच्युतक्षिदस्त्सद्वंहऽऽहा अग्नेर्भस्मास्यग्नेः पुरीषमसि॥१७॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः॥ वि
होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥१८॥ इ
॥३१॥ दं विष्णुर्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य पांऽसुरे स्वा
हा॥१९॥ इरावती धेनुमती हि भूतंऽसूयवसिनी मनवे दशस्या॥ ॥३१॥
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वा
हा॥२०॥ देवश्रुतौ देवेष्वा घोषतम्॥ प्राची प्रेतमध्वरं कल्प
यन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतं॥२१॥ स्वं गोष्ठमावदतं देवी

दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम्॥ अत्र रमेथां वर्ष्मे
न्पृथिव्याः॥२२॥ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विम
मे रजांऽसि॥ यो अस्कभायदुत्तरंऽसधस्थं विचक्रमाणस्त्रे
धोरुगायो विष्णवे त्वा॥२३॥ दिवो वा विष्ण उत वा पृथिव्या महो वा
विष्ण उरोरन्तरिक्षात्॥ उभा हि हस्ता वसुना पृणस्वा प्रयच्छ द
क्षिणादोत सव्याद्विष्णवे त्वा॥२४॥ प्र तद्विष्णुः स्तवते वीर्येण मृ
गो न भीमः कुचरो गिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियं
ति भुवनानि विश्वा॥२५॥ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।३२॥

विष्णोः स्यूरसि विष्णोर्ध्रुवोसि॥ वैष्णवमसि विष्णवे त्वा॥२६॥ देवस्य
त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ आददे नार्यसी
दमहꣳ रक्षसो ग्रीवा अपि कृन्तामि॥ बृहन्नसि बृहद्रवा बृहती ह३
मिन्द्राय वाचं वद॥ रक्षोहणं वलगहनं वैष्णवीम्॥२७॥ इदमहं तं वल
गमुद्वपामि यन्नो निष्ट्यो यममात्यो निचखान॥ इदमहं तं वलग
मुद्वपामि यन्नः समानो यमसमानो निचखान॥ इदमहं तं वलग
२स मुद्वपामि यन्नः सबन्धुर्यमसबन्धुर्निचखान॥ इदमहं तं वलग
मुद्वपामि यन्नः सजातो यमसजातो निचखानोत्कृत्यां किरामि॥२८॥

॥३३

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा॥ जनराडसि र
क्षोहा सर्वराडस्यमित्रहा॥२९॥ रक्षोहणो वलगहनः प्रोक्षामि वै
ष्णवान् रक्षोहणो वलगहनोवनयामि वैष्णवान्॥ रक्षोहणो व
लगहनोवस्तृणामि वैष्णवान्॥३०॥ रक्षोहणौ वलगहनाउपद
धामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी॥ वैष्णवम
सि वैष्णवा स्थ॥३१॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्याम्॥ आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि॥ य
वोसि यवयास्मद्द्वेषो यवयारातीः॥ दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२३॥ शुंधंतांल्लोकाः पितृषदनाः पितृषदनमसि॥ उद्दिवꣳ स्तभानान्त
रिक्षं पृण दृꣳहस्व पृथिव्याम्॥२३॥ द्युतानस्त्वा मारुतो मिनोतु मित्रा
वरुणौ ध्रुवेण धर्मणा॥ ब्रह्मवनित्वा क्षत्रवनिरायस्पोषवनि पर्यूहा
मि॥२४॥ ब्रह्मदृꣳह क्षत्रंदृꣳहायुर्दृꣳह प्रजांदृꣳह॥ ध्रुवासि ध्रु
वोऽस्मिन्यजमान आयतने भूयात्॥ घृतेन द्यावापृथिवी पूर्येथा
मिंद्रस्य छदिरसि विश्वजनस्य छाया॥२५॥ परित्वा गिर्वणो गिर
इमा भवंतु विश्वतः॥ वृद्धायुमनु वृद्धयो जुष्टा भवंतु जुष्टयः॥२६॥
इंद्रस्य स्यूरसींद्रस्य ध्रुवोऽसि॥ ऐंद्रमसि वैश्वदेवमसि॥२७॥ ध्या॥ वि ॥३६॥

भूरसि प्रवाहणो वन्हिरसि हव्यवाहनः॥ श्वात्रोऽसि प्रचेतास्तु
थोऽसि विश्ववेदाः॥२८॥ उशिगसि कविरंघारिरसि बंभारिः॥ अ
वस्यूरसि दुवस्वान्छुंध्यूरसि मार्जालीयः॥२९॥ ऋतधामासि
स्वर्ज्योतिः समुद्रोऽसि विश्वव्यचाः॥ अजोऽस्येकपादहिरसि बुध्न्यः॥
॥३०॥ सम्राळसि कृशानुः परिषद्योऽसि पवमानः॥ नभोऽसि प्रत
क्वा मृष्टोऽसि हव्यसूदनः॥३१॥ समूह्योऽसि विश्ववेदा उग्नातिरिक्र
स्यप्रतिष्ठा॥ अग्नयः सगराः सगरास्थ सगरेण नाम्ना रौद्रे
+ मा९ णानीकेन॥ पातमाग्नयः पिपृतमाग्नयो नमो वोऽस्तु मामाहिꣳसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ३५ ॥ ह ॥ ४२ ॥ छ ॥ ज्योतिरसिविश्वरूपंविश्वेषान्देवाᳬ समित् ॥ त्वᳬ
सोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यः ॥ उरु यंतासिवरूथᳬ स्वाहा ॥ नी १५
जुषाणो अप्तु राज्यस्यवेतु स्वाहा ॥ ४३ ॥ अग्नेनय सुपथाराये अस्मा
न्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठां
तेनमउक्तिंविधेम ॥ ४४ ॥ अयन्नो अग्निर्वरिवस्कृणोत्वयं मृधः
पुर एतुप्रभिंदन् ॥ अयंवाजांजयतुवाजसाता अयᳬ शत्रून्जय
तुजर्हृषाणः स्वाहा ॥ ४५ ॥ उरुविष्णोविक्रमस्वोरुक्षयायनस्कृधि ॥
घृतंघृतयोनिपिबप्रप्रयज्ञपतिंतिरस्वाहा ॥ ४६ ॥ देवसवितरे ॥ ३५ ॥

षते सोमस्तᳬ रक्षस्वमात्वादभन् ॥ ॥ एतत्त्वं देवसोमदेवो
देवाँऽउपागाः ॥ ४७ ॥ इदमहं मनुष्यान्सह रायस्पोषेण स्वाहा नि
र्वरुणस्यपाशान्मुच्ये ॥ अग्नेव्रतपास्त्वेव्रतपाः ॥ ४८ ॥ यातववत
नूर्मय्यभूदेषासात्वयियाममतनूस्त्वय्यभूदियᳬ सामयि ॥
यथायथन्नोव्रतपतेव्रतान्यनुमेदीक्षांदीक्षापतिरमᳬस्त
नुतपस्तपस्पतिः ॥ ४९ ॥ उरुविष्णोविक्रमस्वोरुक्षयायनस्कृधि ॥
घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिरस्वाहा ॥ ५० ॥ ये अत्यन्याँऽ
अगान्नान्याँऽउपागाम् ॥ अर्वाक्त्वापरेभ्यःपरोवरेभ्यः ॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३५॥ तंत्वाजुषामहे देववनस्पते देवयुज्यायै ॥ देवास्त्वा देवयुज्या
यै जुषंतां विष्णवेत्वा ॥५२॥ ओषधेत्राय । स्व स्वधिते मैनꣳ
हिꣳसीः ॥ दिवंम्मा लेखीरंतरिक्षंमा हिꣳसीः पृथिव्यासंभ
व ॥५३॥ अयꣳ हित्वा स्वधितिस्तेतिजानः प्रणिनायमहते
सौभगाय ॥ अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रव
ल्शा वि वयꣳ रुहेम ॥५४॥ ध्या॥

इति शुक्लयजुर्वेदसंहितायां काण्विशाखायां ध्यायेनेपंचमोध्यायः ॥ ३५॥

हरिः ॐ म ॥ देवस्यत्वा । सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णोह
स्ताभ्याम् ॥ आददे नार्यसीदमहꣳ रक्षसां ग्रीवा अपि कृंता
मि ॥ यवोसि यवयास्मद्द्वेषो यवयारातीः ॥ दिवेत्वांतरिक्षाय त्वा
पृथिव्यैत्वा ॥ शुंधंतां लोकाः पितृषदनाः पितृसदनमसि ॥
॥१॥ अग्रेणीरसि । स्वावेशा उन्नेतृणामेतस्य वित्तादधि त्वा
स्थास्यति ॥ देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधी
भ्यः ॥ दिवमग्रेणास्पृक्षा आंतरिक्षं मध्येनाप्राः पृथिवी
मुपरेणादृꣳहीः ॥२॥ या ते धामान्युश्मसि गमध्यै यत्र गावो भू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिशृंगा अयासः ।। अत्राह तदुरुगायस्य विष्णोः परमं पदमव
भारि भूरि ।।३।। ब्रह्मवनिं त्वा क्षत्रवनिं रायस्पोषवनिं पर्यूहामि ।।
।।३६।। ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ।।४।। विष्णोः कर्माणि
पश्यत यतो व्रतानि पस्पशे ।। इन्द्रस्य युज्यः सखा ।।५।। तद्विष्णोः ।।३६।।
परमं पदꣳ सदा पश्यन्ति सूरयः ।। दिवीव चक्षुराततम् ।।६।।
परिवीरसि । परि त्वा दैवीर्विशो व्ययन्ताम् ।। परीमं यजमानꣳ
रायो मनुष्याणाम् ।। दिवः सूनुरस्येष ते पृथिव्यां लोक आर
ण्यस्ते पशुः ।।७।। उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो

वह्नितमान् ।। देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ।।८।। रेवतीर
मध्वं बृहस्पते धारया वसूनि ।।९।। ऋतस्य त्वा देवहविः पाशेन
प्रतिमुञ्चामि धर्षा मानुषः ।। देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्याम् ।।९।। अग्नीषोमाभ्यां जुष्टं नियुनज्मि ।।
अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता मन्यतामनु पितानु भ्रा
ता सगर्भ्योऽनु सखा सयूथ्यः ।। अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ।।१०।।
अपां पेरुरस्यापो देवीः स्वदन्तु ।। स्वात्तं चित्सद्देवहविः ।।११।। सन्ते
प्राणो वातेन गच्छतां समङ्गानि यजत्रैः ।। संयजमान आशिषा ।।१२।।

घृतेनाक्तौ। पशुंस्त्रायेथां२ रेवती यजमाने॥ प्रियन्धा आविश॥१३॥
उरोरंतरिक्षा॥ सजूर्देवेन वातेन॥ अस्य हविषस्त्मनायज सम
स्यतन्वाभव॥१४॥ वर्षो वर्षीयसिं यज्ञेयज्ञपतिंधाः॥ स्वाहादे
वे वेभ्यो देवेभ्यः स्वाहा॥ माहिर्भूर्मा पृदाकुः॥१५॥ नमस्त। आताना
॥३६॥ नर्वाप्रेहि॥ घृतस्य कुल्या उप ऋतस्य पथ्या उप॥१६॥ देवीरापः ॥३६॥
शुद्धा वोढ्वं२ सुपरिविष्टा देवेषु॥ सुपरिविष्टा वयं परिवेष्टारो
भूयास्म॥१७॥ वाचं ते। शुंधामि प्राणं ते शुंधामि चक्षुस्ते
शुंधामि श्रोत्रं ते शुंधामि॥ नाभिं ते शुंधामि मेढ्रं ते शुंधामि

पायुं ते शुंधामि चरित्रां२स्ते शुंधामि॥१८॥ मनस्त। आप्यायतां वा
५२ क्त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां२ श्रोत्रं त
आप्यायताम्॥ यत्ते क्रूरं यदास्थितं तत्ते त आप्यायतां तत्ते नि
ष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः॥१९॥ ओषधे त्रायस्व स्वधिते स्व४
मैनं२ हिं२सीः॥ रक्षसां भागोसि निरस्तं२ रक्षः॥२०॥ इद
महं२ रक्षोभितिष्ठामीदमहं२ रक्षोवबाधे। इदमहं२ र
क्षोधमं तमो नयामि॥२१॥ घृतेन द्यावापृथिवी। प्रोर्णुवाथां

वायो वेस्तोकानाम्॥ जुषाणो अग्निराज्यस्य वेतु स्वाहा॥ स्वाहा
कृते ऊर्ध्वनभसं मारुतं गच्छतम्॥२२॥ संते मनो मनसा सं
॥३८॥ प्राणः प्राणेन गच्छताम्॥ रेळसि अग्निष्ट्वा श्रीणात्वापस्त्वा समरि ॥३८॥
णन्॥२३॥ वातस्य त्वा ध्राज्यै पूष्णो रंह्या ऊष्मणो व्यथिषत्॥
प्रयुतं द्वेषः॥२४॥ घृतं घृतपावानः पिबत वसां वसापावानः
पिबत॥ अंतरिक्षस्य हविरसि स्वाहा॥२५॥ दिशः प्रदिश आ
दिशो विदिश उद्दिशो दिग्भ्यः स्वाहा॥ ऐंद्रः प्राणो अंगे अंगे

अंगे

निधीत ऐंद्र उदानो अंगे अंगे निदीध्येः॥२६॥ देव त्वष्टर्भूरि ते संसं
मेतु सलक्ष्मा यद्विषुरूपं भवाति॥ देवत्रा यंतमवसे सखायोनु त्वा मा
तापितरो मदंतु॥२७॥ समुद्रं गच्छ स्वाहा॥ देवं सवितारं गच्छ स्वाहा॥
अंतरिक्षं गच्छ स्वाहा॥ मित्रावरुणौ गच्छ स्वाहा॥ अहोरात्रे गच्छ स्वा
हा॥ छंदांसि गच्छ स्वाहा॥ द्यावापृथिवी गच्छ स्वाहा॥ सोमं गच्छ स्वा
हा॥ यज्ञं गच्छ स्वाहा॥ नभो दिव्यं गच्छ स्वाहा॥ अग्निं वैश्वानरं गच्छ स्वा
हा मनो मे हार्दि यच्छ॥२८॥ दिवं ते धूमो गच्छत्वं तरिक्षं ज्योतिः॥ पृथि
णा१ वीं भस्मनापृण स्वाहा॥२९॥ मापो मौषधीर्हिंसीर्धाम्नो राजंस्तत धाम्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तो वरुणो नो मुंचतु ॥ यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुणो नो
मुंच ॥ २० ॥ सुमित्रिया न आप ओषधयः संतु दुर्मित्रियास्तस्मै
संतु ॥ योस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २१ ॥ इदमापः प्रवहत यत्किंच
॥३१॥न दुरितं मयि ॥ यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥ २२ ॥ हविष्म ॥३१॥
तीरिमा आपो हविष्मा आविवासति ॥ हविष्मान्देवो अध्वरो ह
विष्मा अस्तु सूर्यः ॥ २३ ॥ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि ॥
इंद्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी स्थ ॥ विश्वेषां

देवानां भागधेयी स्थ ॥ २४ ॥ अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ॥ ता
नो हिन्वंत्वध्वरम् ॥ २५ ॥ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ॥ ऊर्ध्वो
अध्वरं दिवि देवेषु होत्रा यच्छ ॥ २६ ॥ सोम राजन्विश्वास्त्वं प्रजा उपा
वरोह ॥ विश्वास्त्वां प्रजा उपावरोहंतु ॥ २७ ॥ शृणोत्वग्निः समिधा हवं
मे शृण्वंत्वापो धिषणाश्च देवीः ॥ श्रोता ग्रावाणो विदुषो न यज्ञं शृणो
तु देवः सविता हवं मे स्वाहा ॥ २८ ॥ देवीरापो अपां नपाद्यो व ऊर्मिर्हवि
ष्य इंद्रियावान्मदिंतमः ॥ २९ ॥ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यः ॥ ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सां भाग स्थः स्वाहा॥१०॥ कार्षिरसि समुद्रस्य त्वाक्षित्या उन्न
यामि॥ समापो अद्भिरग्मत समोषधीभिरोषधीः॥११॥ यमग्ने
पृत्सु मर्त्यमवा वाजेषु यं जुनाः॥ स यंता शश्वतीरिष स्वाहा॥१२॥
॥४०॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ आददे
रावासि गभीरमिममध्वरं कृधींद्राय सुषूतमम्॥ उत्तमेन प ॥४०॥
विनोर्जस्वंतं मधुमंतं पयस्वंतम्॥ निग्राभ्यास्थ देवश्रुतस्तर्पय
त मा॥१३॥ मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षु
मे।

मे तर्पयत श्रोत्रं मे तर्पयत॥ आत्मानं मे तर्पयत प्रजां मे तर्पयत
२५ पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन्॥१४॥ इंद्राय त्वा व
सुमते रुद्रवते इंद्राय त्वादित्यवते॥ इंद्राय त्वाभिमातिघ्ने श्ये
नाय त्वा सोमभृते अग्नये त्वा रायस्पोषदे॥१५॥ यत्ते सोम दिवि ज्यो
तिर्यत्पृथिव्यां यदुरावंतरिक्षे॥ तेनास्मै यजमानायोरु
राये कृध्यधि दात्रे वोचः॥१६॥ श्वात्रा स्थ। वृत्रतूरो राधोगूर्ता
अमृतस्य पत्नीः॥ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिबत॥ ४४॥ ना ने मा सं विक्थ्या॥ ९ दुर्ज्ञौ घस्वधि परोवीड्वी सुती
वीळ्येथाम् ऊर्जं दधाथाम्॥ पा प्या हुतो नसोमः॥ ४५॥ प्रागपा॥
गुदंगधुराक्स्सर्वते स्वाहिद्या आधावंतु॥ अंबुनिष्पर स्सनुरा॥ बिंदा
॥५१॥ मू॥ ४६॥ त्वमंगप्रशंसिषो देवः शविष्ठ मर्त्यम्॥ न त्वदन्यो मघ ॥५॥
वन्नास्ति मर्डितेन्द्र ब्रवीमि ते वचः॥ ५०॥ धा॥ ६॥

५

व

॥ श्री॥ हरिः ॐ म॥ वाचस्पतये पवस्व ...॥ अंशुभ्यां गभस्ति
पूतः॥ देवो देवेभ्यः पवस्व एषां भागो सि मधुमतीर्न इषः
स्कृधि॥ १॥ यत्ते सोमादाभ्यन्नाम जागृवि तस्मै ते सोम सो
माय स्वाहा॥ स्वाहोर्वन्तरिक्षमन्वेमि स्वांकृतो सि विश्वेभ्य
इंद्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः॥ २॥ मनस्त्वाष्टु स्वाहा त्वा
स्वभवः सूर्याय॥ देवेभ्यस्त्वा मरीचिपेभ्यो देवांशो यस्मै
त्वेळे॥ तत्सत्यमुपरिप्रुता भंगेन हतो सौ फट्॥ प्राणाय त्वा
व्यानाय त्वा॥ ३॥ उपयामगृहीतोस्यंतर्यच्छ मघवं पाहि सो
मं॥ उरुष्य रायो वेषो यजस्व॥ ४॥ अंतस्ते द्यावापृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४२॥ वीद्ध्याम्यंतर्दधाम्युर्वंतरिक्षम् ॥ सजूर्देवेभिरवरैः प
रैश्चांतर्यामे मघवं मादयस्व ॥५॥ स्वाहोर्वंतरिक्षमन्वेमि
स्वांकृतोसि विश्वेभ्य इंद्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ॥ म
नस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय ॥ देवेभ्यस्त्वा मरीचिभ्य पे
उदानाय त्वा ॥६॥ आ वायो भूष शुचिपा उप नः सहस्रंते नि
युतो विश्ववारा ॥ उपो ते अंधो मद्यमयामि यस्य देव दधिषे
पूर्वपेयं वायवे त्वा ॥७॥ इंद्रवायू इमे सुता उप प्रयोभि
रागतं ॥ इंदवो वामुशंति ॥८॥ उपयामगृहीतोसि वाय
व इंद्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥९॥ अयं ॥४२॥

५

वां मित्रावरुणा सुतः सोम ऋतावृधा ॥ ममेदिह श्रुतꣳ ह
वम् ॥ उपयामगृहीतोसि मित्रावरुणाभ्यां त्वा ॥१॥ राया वय
ꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः ॥ तां धेनुं मित्रा
वरुणा युवं नो विश्वाहा धत्तमनपस्फुरंतीम् ॥ एष ते योनि
रृतायुभ्यां त्वा ॥१०॥ या वां कशा मधुमत्यश्विना सूनृतावती ॥
तया यज्ञं मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यां त्वैष ते
योनिर्माध्वीभ्यां त्वा ॥११॥ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्ये
ष्ठतातिं बर्हिषदꣳ स्वर्विदम् ॥ प्रतीचीनं वृजनं दोहसे धुनिमा
शुं जयंतमनु यासु वर्धसे ॥ उपयामगृहीतोसि शंडाय त्वा ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषतेयोनिर्वीरतांपाह्यपमृष्टःशंडोदेवास्त्वाशुक्रपाःप्र
॥७२॥ णयंत्वनाधृष्टासि॥ सुवीरोवीरान्प्रजनयंपरिह्यभिरायः
स्पोषेणयजमानम्॥ संजग्मानोदिवापृथिव्याशुक्रःशुक्र
शोचिषानिरस्तःशंडःशुक्रस्याधिष्ठानमसि॥१३॥ अच्छि
५म न्नस्यतेदेवसोमसुवीर्यस्यरायस्पोषस्यदृदितारस्याम॥ सा
प्रथमासंस्कृतिर्विश्ववारासप्रथमोवरुणोमित्रोअग्निः॥१४॥
सप्रथमोबृहस्पतिश्चिकित्वांस्तस्माऽइंद्रायसुतमाजुहोत
स्वाहा॥ तृंपंतुहोत्रामध्वोर्यास्विष्टय्याःसुभृतंयत्स्वाहा॥१५॥ ॥७२॥

अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायुरजसोविमाने॥
इममपांसंगमेसूर्यस्यशिशुंनविप्रामतिभिरिहंति॥
उपयामगृहीतोसिमर्कायत्वा॥१६॥ मनोनयेषुहवनेषुति
५ ग्मंविप्राच्यावनुधोदुवंता॥ आयःशर्याभिस्तुविनृम्णोऽ
अस्याःश्रीणीतादिशंगभस्तौ॥१७॥ एषतेयोनिःप्रजाः
पाह्यपमृष्टोमर्कोदेवास्त्वामंथिपाःप्रणयंत्वनाधृष्टासि॥
सुप्रजाःप्रजाःप्रजनयन्परिह्यभिरायस्पोषेणयजमा
नम्॥ संजग्मानोदिवापृथिव्यामंथीमंथिशोचिषानिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥——॥ स्तोमपृष्ठो मन्थिनोऽधिष्ठानमसि ॥१८॥ अच्छिन्नस्य ते देव सोम
सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ॥ सा प्रथमा संस्कृ-
तिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥ स प्रथमो
बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय सुतमाजुहोत स्वाहा ॥
तृंपंतु होत्रा मध्वो यः स्विष्टं यत्स्वाहा ॥१९॥ छ ॥
ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ॥ अप्सु-
क्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥२०॥
उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः ॥ पाहि यज्ञं पाहि ॥——॥

यज्ञपतिम् ॥२१॥ विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्य-
भि सवनानि पाहि ॥ सोमः पवते सोमः पवते सोमः पवते ॥२२॥
अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय प-
वते ॥ इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां प-
वते सुभूताय पवते ब्रह्मवर्चसाय पवते ॥ विश्वेभ्यस्त्वा देवे-
भ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥२३॥ उपयामगृहीतो-
सीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवं गृह्णामि ॥ यत्त इन्द्र
बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥ देवेभ्यस्त्वादेवायुवंगृह्णामियज्ञस्यायुषे मित्रावरुणाभ्यांत्वा
देवायुवंगृह्णामियज्ञस्यायुषे॥ इन्द्रायत्वादेवायुवंगृह्णामि
यज्ञस्यायुषऽइन्द्राग्निभ्यांत्वादेवायुवंगृह्णामियज्ञस्यायुषे॥
इन्द्रायत्वादेवायुवंगृह्णामियज्ञस्यायुषइन्द्रावरुणाभ्यांत्वा
ज्ञ देवायुवंगृह्णामियज्ञस्यायुषे॥ इन्द्राबृहस्पतिभ्यांत्वादेवायुवं
प गृह्णामियज्ञस्यायुषइन्द्राविष्णुभ्यांत्वादेवायुवंगृह्णामियज्ञ
स्यायुषे॥२५॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृत
आजातमग्निम्॥ कविꣳसम्राजमतिथिंजनानामासन्नो ॥२५॥

पावकंजनयन्तदेवाः॥२६॥उपयामगृहीतोसिध्रुवोसिध्रुव
क्षितिर्ध्रुवाणांध्रुवतमोच्युतानामच्युतक्षित्तमः॥एषते
योनिर्वैश्वानरायत्वा॥२७॥ध्रुवंध्रुवेणमनसावाचासोममवनया
मि॥अथानइन्द्रइद्विशोःसपत्नाःसमनस्करत्॥२८॥यस्तेद्रप्स स
कन्दतियस्तेअꣳशुर्ग्रावच्युतोधिषणयोरुपस्थात्॥अध्वर्योर्वा परिवा
यःपवित्रात्तंतेजुहोमिमनसावषट्कृतꣳस्वाहादेवानामुत्क्रम
णमसि॥२९॥उपयामगृहीतोसिमधवेत्वोपयामगृहीतोसिमा
धवायत्वा॥उपयामगृहीतोसिशुक्रायत्वोपयामगृहीतोसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४७॥ योनिरिन्द्रायत्वामरुत्वते॥३५॥ मरुत्वंतंवृषभंवावृधानमक
कवारिंदिव्यꣳशासमिन्द्रम्॥ विश्वासाहमवसेनूतनायोग्रꣳ
सहोदामिहतꣳहुवेम॥ उपयामगृहीतोसिमरुतामोजसेत्वा॥३६॥
सजोषाइन्द्रसगणोमरुद्भिःसोमंपिबवृत्रहाशूरविद्वांजहिश
त्रूꣳरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥ उपयामगृही
तोसिमहेन्द्रायत्वैषतेयोनिर्महेन्द्रायत्वा॥३७॥ महाꣳइन्द्रो
नृवदाचर्षणिप्राऽउतद्विबर्हाअमिनःसहोभिः॥ अस्मद्र्य
ग्वावृधेवीर्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत्॥ उपयामगृ ॥४७॥

हीतोसीन्द्रायत्वामत्वैषतेयोनिमहेन्द्रायत्वा॥३८॥ महाꣳइ
न्द्रोयओजसापर्जन्योवृष्टिमांऽइव॥ स्तोमैर्वत्सस्यवावृधे॥
उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिमहेन्द्रायत्वा॥३९॥
॥ॐ इतिसंहितापाठेसप्तमोध्यायः॥७॥ हरिः ॐ॥
॥ॐ कदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे॥ उपोपेन्नुमघवन्भू
यऽइन्नुतेदानंदेवस्यपृच्यतऽआदित्येभ्यस्त्वा॥१॥ कदाचनप्रयु
च्छस्युभेनिपासिजन्मनि॥ तुरीयादित्यसवनंतऽइन्द्रियमातस्था
अमृतंदिव्यादित्येभ्यस्त्वा॥२॥ यज्ञोदेवानांप्रत्येतिसुम्नमादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति

॥४८॥ सासो भवताम्वृष्टयंतः॥ आवोर्वाचीसुमतिर्ववृत्याद् ऌहोश्चिद्या
वरिवो वित्तरासदादित्येभ्यस्त्वा॥ विवस्वऽआदित्यैषते सो
मपीथः तस्मिन्मत्स्व॥३॥ श्रदस्मै नरो वचसे दधातन यदाशी
र्दादंपती वाममश्नुतः॥ पुमान्पुत्रो जायते विंदते वस्वधा विश्वाहा
रपऽएधते गृहे॥४॥ वाममद्य सवितर्वाममु श्वो दिवे दिवे वा
ममस्मभ्यं सावीः॥ वामस्य हि क्षयस्य देव भूरेरया धिया वाम
भाजः स्याम॥५॥ उपयामगृहीतोसि सावित्रोसि चनोधाश्चनो
मयि धेहि॥ जिन्व यज्ञं जिन्व यज्ञपतिं भगाय सवित्रे त्वा॥६॥ ॥४९॥

उपयामगृहीतोसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः॥ विश्वे
भ्यस्त्वा देवेभ्यऽएषते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥७॥ उपयामगृ
हीतोसि बृहस्पतिसुतस्य ते देव सोम॥ इन्दऽइन्द्रियावतः पत्नी
मु वतो ग्रहाँ२ऽऋध्यासम्॥८॥ अहं परस्तादहमवस्ताद्यदंतरिक्षं
तदु मे पितासीत्॥ अहꣳसूर्यमुभयतो ददर्शाहं देवानां परमं गुहा
यत्॥९॥ अग्नावाक्पत्नि सजूर्देवेन त्वष्ट्रा॥ सोमं पिब स्वाहा॥१०॥
प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि॥ प्रजापतेस्ते वृष्णो रे
तोधसो रेतोधामशीय॥११॥ उपयामगृहीतोसि हरिरसि
हारियोजनो हरिभ्यां त्वा॥ हर्योर्धाना स्थ सहसोमाऽइन्द्राय॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ३॥ यत्तेदेवसामाश्वसनिर्भ्योगोसनिः ॥ तस्यत ऽ इष्टयजुषस्तु
तस्तोमस्य शस्तोक्थस्योपहूत ऽ उपहूतस्य भक्षयामि ॥१३॥
युक्ष्वाहिकेशिना हरीवृषणा कक्ष्यप्रा ॥ अथान ऽ इन्द्र सोमपागि
रामुपश्रुतिं चर ॥ उपयामगृहीतोसीन्द्राय त्वा षोडशिन ऽ
एषते योनिरिन्द्राय त्वा षोडशिने ॥१४॥ आतिष्ठ वृत्रहन्रथं
युक्तातेब्रह्मणाहरी ॥ आर्वाचीनं सुते मनो ग्रावा कृणोतु व
ग्नुना ॥ उपयामगृहीतोसीन्द्राय त्वा षोडशिन ऽ एषते योनि
रिन्द्राय त्वा षोडशिने ॥१५॥ इन्द्रमिद्धरी वहतो प्रतिधृष्टश ॥ ९॥

वसम् ॥ ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ उपयामगृ
हीतोसीन्द्राय त्वा षोडशिन ऽ एषते योनिरिन्द्राय त्वा षोडशिने ॥१६॥
अ यस्मान्न जातः परोन्यो ऽ अस्ति य आविवेश भुवनानि विश्वा ॥ प्र
जापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोड
शी ॥१७॥ इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतु
रग्र एतम् ॥ तयोरहमनुभक्षं भक्षयामि वाग्देवी जुषाणा
सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥१८॥ अग्ने पवस्व स्वपाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वं

।।५०।। वसुआ सुवोर्ज्जमिषंचनः ।। आरेबाधस्वदुछुनाम् ।। उपयाम
गृहीतोस्यग्नयेत्वावर्चसऽएषते योनि रिग्नयेत्वावर्चसे ।। अ
ग्नेवर्चस्वन्वर्चस्वा ऽ्ँ देवेष्वसि ।। वर्चस्वानहं मनुष्येषुभूया
सम् ।। १९ ।। अग्नेपवस्वस्वापाऽअस्मेवर्चः सुवीर्यम् ।। दधद्र
यिमयिपोषम् ।। उपयामगृहीतोस्यग्नयेत्वावर्चसऽएषते स्वं
योनिरग्नयेत्वावर्चसे ।। अग्नेवर्चस्वन्वर्चस्वा ऽ्ँ देवेष्वसि ।। छ
वर्चस्वानहं मनुष्येषुभूयासं ।। २० ।। उत्तिष्ठन्नोजसासहपी ।।५०।।
त्विशिप्रेऽअवेपयः ।। सोममिन्द्रचमूसुतम् ।। उपयामगृ

हीतोसीन्द्रायत्वौजसऽएषते योनिरिंद्रायत्वौजसे ।। इन्द्रौ
जः स्वंन्नोजस्वा ऽ्ँ स्त्वंन्देवेष्वसि ।। ओजस्वानहं मनुष्येषुभू
यासम् ।। २१ ।। अदृश्रमस्यकेतवोविरश्मयोजनांऽअनु ।। भ्रा
जन्तोऽअग्नयोयथा ।। उपायामगृहीतोसिसूर्यायत्वाभ्राजऽए
षतेयोनिःसूर्यायत्वाभ्राजे ।। सूर्यभ्राजस्वभ्राजस्वा ऽ्ँ स्त्वन्दे
वेष्वसि ।। भ्राजस्वानहंमनुष्येषुभूयासम् ।। २२ ।। उदुत्यंजा
तवेदसन्देवंवहंतिकेतवः ।। दृशेविश्वायसूर्यम् ।। उप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५१॥ पामगृहीतोसिसूर्यायत्वाभ्राजऽएषतेयोनिरिसूर्यायत्वाभ्रा
जे॥सूर्यभ्राजस्वंभ्राजस्वाꣳस्त्वंदेवेष्वसि॥भ्राजस्वा
॥२३ न्हमनुष्येषुभूयासम्॥चित्रन्देवानामुदगादनीकं
चक्षुर्मित्रस्यवरुणस्याग्नेः॥आप्राद्यावापृथिवीऽअं
तरिक्षꣳसूर्यऽआत्माजगतःतस्थुषश्च॥उपयामगृही
तोसिसूर्यायत्वाभ्राजऽएषतेयोनिःसूर्यायत्वाभ्राजे॥
सूर्यभ्राजस्वंभ्राजस्वाꣳस्त्वन्देवेष्वसि॥भ्राजस्वान्हम ॥५१॥

नुष्येषुभूयासम्॥२४॥चित्रन्ऽइन्द्रम्॥ओहनीचायच्छपत
न्यतः॥योऽअस्मांऽअभिदासस्पदंगमयातमः॥उपया
मगृहीतोसीन्द्रायत्वाविमृधऽएषतेयोनिरिन्द्रायत्वावि
मृधे॥२५॥वाचस्पतिंविश्वकर्माणमूतयेमनोयुजंवाजे
अद्याहुवेम॥सनोविश्वानिभुवनानिजोषद्विश्वशंभू
सा रवसेसाधुकर्मा॥उपयामगृहीतोसीन्द्रायत्वाविश्वकर्मण
एषतेयोनिरिन्द्रायत्वाविश्वकर्मणे॥२६॥विश्वकर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५२॥ नहविषावावृधानः स्वयंयजस्वपृथिवीमुतद्याम्॥मु
ह्यंत्वन्येऽअभितःसपत्नाइहास्माकंमघवासूरिरस्तु॥उ
पयामगृहीतोसीन्द्रायत्वाविश्वकर्मणऽएषतेयोनिरिन्द्रायत्वावि
श्वकर्मणे॥२७॥विश्वकर्मन्हविषावर्धनेनत्रातारमिन्द्र
मकृणोरवध्यम्॥तस्मैविशःसमनमंतपूर्वीरयमुग्रोविह
व्योयथासत्॥२८॥उपयामगृहीतोस्यग्नयेत्वागायत्रछंदसं
गृह्णामीन्द्रायत्वात्रिष्टुप्छंदसंगृह्णामिविश्वेभ्यस्त्वादेवेभ्यो
जगच्छंदसंगृह्णाम्यनुष्टुप्तेभिगरः॥२९॥ब्रेषीनांत्वा ॥५२॥

पत्मन्नाधूनोमिकुकूननानांत्वापत्मन्नाधूनोमिभंदनानांत्वाप
त्मन्नाधूनोमिमदिंतमानांत्वापत्मन्नाधूनोमि॥शुक्रंत्वाशुक्रऽ
आधूनोम्यह्नोरूपेसूर्यस्यरश्मिषु॥३०॥ककुभंरूपंवृ
षभस्यरोचतेबृहत्सोमः सोमस्यपुरोगाः शुक्रः शुक्रस्यपुरो
गाः॥यत्तेसोमादाभ्यंनामजागृवितस्मैत्वागृह्णामित
स्मैतेसोमसोमायस्वाहा॥३१॥उशिक्त्वंदेवसोमाग्नेः
प्रियंपाथोपीहिवशीत्वंदेवसोमेन्द्रस्यप्रियंपाथोपीहि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।५३।। अस्मत्सरवात्चंद्देवसोमविश्वेषांदेवानांप्रियंपाथोपीहि ।।२२।।

।। ५१।। ५१।। ५१।। इति संहितापाठे अष्ठमो

ध्याय: ।। ५१।। ५१।।

हरि: हि: ॐ म् ।। प्राणायमेवर्चोदावर्चसेपवस्वव्या

नायमेवर्चोदावर्चसेपवस्व ।। उदानायमेवर्चोदावर्चसे

पवस्ववाचेमेवर्चोदावर्चसेपवस्व ।।१।। क्रतूदक्षाभ्यांमे

वर्चोदावर्चसेपवस्वश्रोत्रायमेवर्चोदावर्चसेपवस्व ।। च

क्षुर्भ्यां मेवर्चोदसोवर्चसेपवेस्व ।।

थाम् ।।२।। आत्मने मेवर्चोदा वर्च

सेपव स्वौजसे मेवर्चे

र्चोदावर्चसेपवस्वायुषेमेवर्चोदावर्चसेपवस्व ।। विश्वाभ्योमेप्रजा

भ्योवर्चोदसौवर्चसेपवेथाम् ।।३।। कोसि कतमोसि कस्यासि कोना

मासि ।। यस्यतेनामामन्महि यंत्वासोमेनातीतृपाम ।। भूर्भुव:

स्व: सुप्रजा: प्रजया भूयासं ।। सुवीरोवीरै: सुपोष: पोषै: ।।५।। उदुत्यं

जातवेदसंदेवंवहंति केतव: ।।६।। विश्वायसूर्यं ।। चित्रंदेवा

नामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्ने: ।। आप्राद्यावापृ

थिवीअंतरिक्षंसूर्य आत्माजगतस्तस्थुषश्च ।।७।। अग्नेन

यसुपथारायेअस्मान्विश्वानिदेवयुनानिविद्वान् ।। युयोध्यस्म

देव१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५४॥ जुहुराणमेनोभूयिष्ठान्तेनमउक्तिंविधेम॥८॥अयन्नो॥अग्निर्वरिव
स्कृणोतु यंमृधः पुरएतु प्रभिदन्॥अयंवाजांजयतु वाजसातौ॥अयं
शत्रूंजयतु जर्हृषाणः स्वाहा॥९॥रूपेणवोरूपमभ्यागांतुथोवोविश्ववे
दाविभजतु॥ऋतस्यपथाप्रेतचंद्रदक्षिणाः॥१०॥विस्वःपश्यव्यंतरिक्षं ॥५४
यतस्वसदस्यैः॥ब्राह्मणमद्यविदेयंपितृमंतंपैतृमत्यमृषिमार्षेयं
सुधातुदक्षिणम्॥११॥अस्मद्राताद्देवत्रागच्छप्रदातारमा
विशत॥अग्नयेत्वामह्यंवरुणोददातुसोमृतत्वमश्यात॥१२
आयुर्दात्रएधिमयोमह्यंप्रतिग्रहीत्रे॥रुद्राय त्वामह्यं

वरुणोददातुसोमृतत्वमश्यात॥प्राणोदात्रएधिम
यामह्यंप्रतिग्रहीत्रे॥बृहस्पतयेत्वामह्यंवरुणोददातुसोमृ
तत्वमश्यात॥त्वग्दात्रएधिमयामह्यंप्रतिग्रहीत्रे॥यमाय
त्वामह्यंवरुणोददातुसोमृतत्वमश्यात॥वयोदात्रएधि
मयोमह्यंप्रतिग्रहीत्रे॥१३॥कोदात्कस्माअदात्कामोदा
त्कामायादात्॥कामोदाताकामःप्रतिग्रहीताकामैतत्तेत
वकामःसतापुनजामहे॥१४॥समिंद्रणोमनसानेषिगोभिः
संसूरिभिर्मघवन्संस्वस्त्या॥संब्रह्मणादेवकृतंयदस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सन्देवानाꣳसुमतौयज्ञियानाम्॥१५॥ संवर्चसापयसासंतनूभिरगं ॥५५॥
न्महिमनसासꣳशिवेन॥ त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुत
न्वोयद्विलिष्टम्॥१६॥ धातारातिः सवितेदंजुषंतांप्रजापतिर्निधि
॥५५॥ पादेवोऽअग्निः॥ त्वष्टाविष्णुः प्रजयासꣳरराणोयजमानाय
द्रविणंदधातु॥१७॥ सुगावोदेवाः सदनाऽअकर्मयऽआजग्मे
दꣳसवनंजुषाणाः॥ भरमाणावहमानाहवीꣳष्यस्मेधत्तवस
वोवसूनि॥१८॥ यांऽआवहउशतोदेवदेवाꣳस्तान्प्रेरयस्वेग्ने

अग्नेसधस्थे॥ जक्षिवाꣳसः पपिवाꣳसश्चविश्वेसुंघर्मꣳ
५२ स्वरातिष्ठतानु॥१९॥ वयꣳहित्वाप्रयतियज्ञेअस्मिन्नग्नेहो
तारमवृणीमहीह॥ ऋधगयाऋधगुताशमिष्ठाः प्रजानन्य
ज्ञमुपयाहिविद्वान्॥२०॥ देवागातुविदोगातुंवित्त्वागातु
मित॥ मनसस्पतइमन्देवयज्ञꣳस्वाहावातेधाः॥२१॥
यज्ञंयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा॥ एष
तेयज्ञोयज्ञपतेसहसूक्तवाकः सर्ववीरस्तंजुषस्वस्वाहा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहिर्भूर्मा पृदाकुः॥२२॥ उरुꣳहि राजा वरुणश्चकार सूर्याय
पंथा मन्वेतवा उ॥ अपदे पादा प्रतिधातवेकरुतापव
क्ताहृदयाविधश्चित्॥ नमो वरुणायाभिष्ठितो वरुणस्य पा
॥५८॥ शः॥२३॥ अग्नेरनीकमप आविवेशापान्नपात्प्रतिरक्ष ॥५८॥
न्नसुर्यं॥ दमेदमे समिधं यक्ष्यग्ने प्रतिते जिह्वा घृतमुच्च
रण्यत्स्वाहा॥२४॥ समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वो
षधीरुतापः॥ यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके

विधेम यत्स्वाहा॥२५॥ देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सु
भृतं बिभृत॥ देव सोमैष ते लोकः परि च वक्षि शं च वक्षि॥
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः॥ अव देवैर्देव
कृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिष
स्पाहि॥ देवानाꣳ समिदसि॥२६॥ एजतु दशमास्यो गर्भो
जरायुणा सह॥ यथायं वायुरेजति यथा समुद्र एजत्येवा
यं दशमास्यो अस्रज्जरायुणा सह॥२७॥ यस्यास्ते यज्ञि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगर्भो यस्या योनिर्हिरण्यी ।। अंगान्यहृता यस्य तं मात्रा सम जी
गमं स्वाहा ।।२८।। पुरुदस्मो विषुरूपं इंदुरंतर्महिमानमा
।।५७।। नंज धीरः ।। एकपदी द्विपदी त्रिपदी चतुष्पदी मष्टापदी भु
वनानु प्रथंतां स्वाहा ।।२९।। मरुतो यस्य हि क्षये पाथा ।।५७।।
दिवो विमहसः ।। स सुगोपातमो जनः ।। ३० ।। मही द्यौः
पृथिवी च न इमं यज्ञं मिमिक्षतां ।। पिपृतां नो भरीमभिः ।।३१।।
आजिघ्र कलशं मह्या त्वा विशंत्विंदवः ।। पुनरूर्जा
६

निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मावि
शताद्रयिः ।। इडे रंते हव्ये काम्ये चंद्रे ज्योतेदिते सरस्व
ति महि विश्रुति ।। एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं
ब्रूतात् ।।३३।। इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः रि४
स्वाहा ।। उपसृजं धरुणं मात्रे धरुणो मातरं धय
न्रायस्पोषमस्मासु दीधरत्स्वाहा ।।३४।। अगन्म ज्योति
रमृता अभूम दिवं पृथिव्या अध्यारुहाम ।। अविदाम दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वान्स्वर्ज्योतिः ।।३५।। युवंतमिंद्रापर्वता पुरोयुधा यो नः पृत
न्यादपतंतमिद्धतं वज्रेणतंतंतमिद्धतं ।। दूरे चत्ताय छंत्सद्ग
हनं यदिनक्षदस्माकं शत्रून्परिशूर विश्वतोदर्मा दर्षीष्ट
।।३६।।
विश्वतः ।। भूर्भुवः स्वः सुप्रजाः प्रजयाभूयासं ।। सुवीरो वी
।।५८।। रैः सुपोषः पोषैः ।।३७।। परमेष्ठ्यभिधीतः प्रजापतिर्वाचि
व्याहृतायामंधो अच्छेतः सविता सन्यां ।। विश्वकर्मा दीक्षा ।।५९।।
यां पूषा सोमक्रयण्यां ।।३८।। इन्द्रश्च मरुतश्च क्रयायोपोत्थि
तः ।। असुरः पण्यमानो मित्रः क्रीतः ।।३९।। विष्णुः शिपिविष्ट

ऊरा आसन्नो विष्णुर्नरंधिषः प्रोह्यमाणः ।। सोम आगतो व रु० १
ण आसंद्यामासन्नः ।।४०।। अग्निराग्नीध्र इन्द्रो हविर्धा
ने ।। अथर्वोपावह्रियमाणो विश्वेदेवा अंशुषु न्युप्यमाने
षु ।।४१।। विष्णुराप्रीतपा आप्याय्यमानो यमः सूयमानो
विष्णुः संभ्रियमाणः ।। वायुः पूयमानः शुक्रः पूतः ।।४२।। शुक्रः तत
क्षीरश्रीर्मन्थी सक्तुश्रीः ।। विश्वेदेवाश्चमसेषून्नीता असुर्हो
मायोद्यतः ।।४३।। रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रव्या॰९

तिष्ठौ तो गृह्यः पीतः पितरो नाराशंसाः सादयमानः ॥ सिं
धुरवभृथाया यतः समुद्रो भ्यवह्रीयमाणः सलिलप्र
प्लुतः ॥५८॥ मयो रोजसा स्कभिता राजांसि वीर्येभिर्वीर
(५७५ तमा शविष्ठा ॥ या पत्येते अप्रतीता सहोभिर्विष्णू अगन्व ॥५७॥
रुणा पूर्वहूतौ ॥५९॥ देवान्दिवमगन्यज्ञस्ततो मा द्रवि
ण णमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु ॥
पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लो

१ म॰ कमगन्यज्ञस्ततो मे भद्रमभूत् ॥६०॥ ॥८॥ इति शुक्लयजुर्वेद
संहितायां याज्ञवल्क्यां तरकाण्वि शाखाध्यायिने नमो
ध्यायः ॥८॥ ॥ श्री ॥० ५८ ॥
॥ हरिः ॐ ॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगा
य ॥ दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पति
र्वाचन्नः स्वदतु ॥१॥ ध्रुवसदं त्वा नृषदं मनःसदम
नःसदमुपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेयोनिरिंद्रायत्वाजुष्टतमम्॥२॥अप्सुसदंत्वाघृतसदं
व्योमसदं॥उपयामगृहीतोसींद्रायत्वाजुष्टंगृण्हाम्येषते
योनिरिंद्रायत्वाजुष्टतमम्॥पृथिवीसदंत्वांतरिक्षसदंदि
॥५७॥ ६४ विसदंदेवसदंनाकसदं॥उपयामगृहीतोसींद्रायत्वाजुष्टंगृ
ण्हाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम्॥३॥अपांरसमु ॥५०॥
द्वयसंसूर्येसंतंसमाहितम्॥अपांरसस्ययोरसस्तंवो
म२ गृण्हाम्युत्तमम्॥उपयामगृहीतोसींद्रायत्वाजुष्टंगृण्हाम्ये
षतेयोनिरिंद्रायत्वाजुष्टतमम्॥४॥ग्रहाऊर्जाहुतयो

व्यंतोविप्रायमतिम्॥तेषांविशिप्रियाणांवोहमिषमूर्जंसमग्र
भं॥उपयामगृहीतोसींद्रायत्वाजुष्टंगृण्हाम्येषतेयोनिरिं
द्रायत्वाजुष्टतमम्॥५॥संपृचस्थसम्माभद्रेणपृंक्त॥वि
पृचस्थविमापाप्मनापृंक्त॥६॥इंद्रस्यवज्रोसिवाजसास्त्वया
२५ यंवाजंसेत॥वाजस्यनुप्रसवेमातरंमहीमदितिंनामवच
साकरामहे॥यस्यामिदंविश्वंभुवनमाविवेशतस्यांनोदेवः
सविताधर्मसाविषत्॥७॥देवीरापोऽअपांनपाद्योऽऊ यो२
र्मिःप्रतूर्तिः॥ककुन्मान्वाजसास्तेनायंवाजंसेत॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्स्वंतरमृतमप्सुभेषजमपा॒मुत प्रशस्तिष्विः॥ अश्वाभ
वतवाजिनः॥ ९॥ वातोवामनोवागंधर्वास्स प्तविंशति
॥दि१॥ तिः॥ तेऽअग्रेश्वमयुंजंस्तेअस्मिन्जवमादधुः॥ १०॥ वात
रंहाभववाजिन्युज्यमानइंद्रस्येवदक्षिणः श्रियैधि॥ यु ॥दि१॥
जंतुत्वामरुतोविश्ववेदसऽआतेत्वष्टापत्सुजवंदधातु॥ ११॥
जवोयस्तेवाजिन्निहितोगुहायःश्येनेपरीत्तोअचरच्चवाते॥
तेननोवाजिंबलवान्बलेनवाजजिच्चभवसमनेचपार
यिष्णुः॥ १२॥ वाजिनोवाजजितोवाजंसरिष्यंतः॥ बृहस्पतेर्भा
गमवजिघ्रत॥ १३॥ देवस्याहंसवितुःसवेसत्यसवसः॥
बृहस्पतेरुत्तमंनाकंरुहेमेंद्रस्योत्तमन्नाकंरुहेम॥
देवस्यवयंसवितुःसवेसत्यसवसः॥ बृहस्पतेरुत्तमन्ना
कमरुहामेंद्रस्योत्तमन्नाकमरुहाम॥ १४॥ बृहस्पतेवाजं
जयबृहस्पतयेवाचंवदत॥ बृहस्पतिंवाजंजापयत॥ १५॥
इंद्रवाजंजयेंद्रायवाचंवदत॥ इंद्रंवाजंजापयत॥ १६॥
एषावस्सासत्यासंवागभूद्ययाबृहस्पतिंवाजमजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जपतं अजीजपत बृहस्पतिं वाजं वनस्पतयो विमुच्यध्वम्॥
॥१७॥ देवस्याहꣳ सवितुः सवे सत्यसवसः॥ बृहस्पतेर्वा
॥६२॥ जजितो वाजं जेषम्॥१८॥ वाजिनो वाजजितोध्वनस्क
भ्नुवन्तः॥ योजना मिमानाः काष्ठां गच्छत॥१९॥ एष स्य वा ॥६२॥
जी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आस
नि॥ क्रतुं दधिक्रा अनु संतवीत्वत् पथामङ्कांस्यन्वापनी
फणत्॥२०॥ उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाजि

प्रगर्धिनः॥ श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जो
तरित्रतः॥२१॥ शं नो भवन्तु वाजिनो हवेषु देवताता मित
द्रवः स्वर्काः॥ जंभयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्म
द्युयवन्नमीवाः॥२२॥ ते नोऽर्वन्तो हवनश्रुतो हवं विश्वे शृ
ण्वन्तु वाजिनो मितद्रवः॥ सहस्रसा मेधसाता सनिष्यवो महो ये
धनꣳ समिथेषु जभ्रिरे॥२३॥ वाजेवाजेवत वाजिनो नो धनेषु
विप्रा अमृता ऋतज्ञाः॥ अस्य मध्वः पिबत मादयध्वं तृप्ता या
त पथिभिर्देवयानैः॥२४॥ आ मा वाजस्य प्रसवो जगम्यादेमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यावा॥ वापृथिवी विश्वरूपे॥ आमागंतंपितरामातरायुवमामासो

मोऽअमृतत्वेनगम्यात॥१८॥ वाजिनो वाजजितो वाजꣳससृवा

म ३ ꣳसः॥ बृहस्पतेर्भागमवजिघ्रतनिमृजानाः॥१९॥ आपयेस्वाहास्वा

पयेस्वाहापिजायस्वाहा क्रतवेस्वाहा॥ वसवेस्वाहाहर्पतयेस्वाहा॥

यदि ३॥ अन्हेमुग्धायस्वाहामुग्धायवैनꣳशिनायस्वाहाविनꣳशिन ॥दि ३॥

आंत्यायनायस्वाहांत्यायभौवनायस्वाहाभुवनस्यपतये स्वा

हाधिपतयेस्वाहा॥ आयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्पतांच

क्षुर्यज्ञेनकल्पताꣳश्रोत्रंयज्ञेनकल्पतां॥ पृष्ठंयज्ञेनकल्प

तांयज्ञोयज्ञेनकल्पतां॥२०॥ जायऽएहिस्वोरोहाव॥ प्रजाप

तेःप्रजाअभूमस्वर्देवाऽअगन्मामृताऽअभूम॥२०॥ अस्मे

वोऽअस्त्विन्द्रियमस्मेनृम्णमुतक्रतुः॥ अस्मेवर्चाꣳसिसंत

वः॥३०॥ नमोमात्रेपृथिव्याऽइयंतेराड्यंतासियमनः॥ ध्रु

वोसिधरुणःकृष्यैक्षेमायरय्यैपोषाय॥३१॥ वाजस्येमंप्रसवः

+ रा ५ सुषुवेग्रेसोमꣳराजानमोषधीष्वप्सु॥ ताऽअस्मभ्यंमधु

मतीर्भवंतुवयꣳराष्ट्रेजागृयामपुरोहिताः॥३२॥ वाजस्येदंप्र

सवऽआबभूवेमाचविश्वाभुवनानिसर्वतः॥ सनेमिरा

जापरियातिविद्वान्रयिंपुष्टिंवर्धयमानोऽअस्मे॥३३॥ वाज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येपं प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट्॥ अदि
त्संतं दापयति प्रजानन्त्से नो रयिं सर्ववीरं नियच्छतु॥२४॥ अग्ने
॥६४॥ अच्छा वदेह नः प्रति नः सुमना भव॥ प्र नो यच्छ सहस्रजित्त्वं हि ध
नदाऽअसि॥२५॥ सोमं राजानमवसेऽग्निमन्वारभामहे॥ आ
दित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिं॥२६॥ प्र नो यच्छत्वर्यमा ॥६४॥
प्र पूषा प्र सरस्वती॥ प्र वाग्देवी ददातु नः॥२७॥ अर्यमणं बृह
स्पतिमिंद्रं दानाय चोदय॥ वाचं विष्णुं सरस्वतीं सवितारं

च वाजिनं॥२८॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्याम्॥ सरस्वत्यै वाचो यंतुर्यंत्रेयेण दधामि॥ बृहस्पतेष्ट्वा सा
म्राज्येनाभिषिंचाम्यसौ इंद्रस्य त्वा साम्राज्येनाभिषिंचामि॥२९॥
अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण
द्विपदो मनुष्यानुदजयतांस्तानुज्जेषम्॥ विष्णुस्त्र्यक्षरेण त्री
निमाँल्लोकानुदजयत्तानुज्जेषं सोमश्चतुरक्षरेण चतुष्पदः
पशूनुदजयत्तानुज्जेषम्॥३०॥ पूषा पंचाक्षरेण पंच दिश
उदजयत्तानुज्जेषं सविता षळक्षरेण षळृतूनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६५॥ दजयत्तानुज्जेषम्॥मरुतः सप्ताक्षरेण सप्तग्राम्यान्पशूनुदजय ॥६५॥
ꣳस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तानुज्जेष
म्॥४१॥मित्रो नवाक्षरेण त्रिवृतꣳस्तोममुदजयत्तमुज्जेषं व
रुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम्॥इंद्र एकादशाक्ष
रेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वेदेवा द्वादशाक्षरेण जग
तीमुदजयꣳस्तामुज्जेषम्॥४२॥वसवस्त्रयोदशाक्षरेण त्र
योदशꣳस्तोममुदजयꣳस्तमुज्जेषꣳरुद्राश्चतुर्दशाक्षरेण
चतुर्दशꣳस्तोममुदजयꣳस्तमुज्जेषम्॥आदित्याः पंचदशा

क्षरेण पंचदशꣳस्तोममुदजयꣳस्तमुज्जेषमदितिः षोड
शाक्षरेण षोडशꣳस्तोममुदजयत्तमुज्जेषम्॥प्राजापतिः
सप्तदशाक्षरेण सप्तदशꣳस्तोममुदजयत्तमुज्जेषम्॥४३॥ ॥

देवसवितः१ आपमे स्वाहा२ वाजस्येमं३ प्र नो यच्छत्वर्यमा४
देवस्य त्वा५ अग्निरेकाक्षरेण६ षष्ठानुवाकेषु॥ दशमोध्या
यः॥

॥६६॥ ॥ इति ईशद्वादशक समाप्तम् ॥ ॥६६॥

अथ द्वितीय दशक (पदपाठ)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ ॥श्रीगणेशाय नमः॥ श्रीसरस्वतीय नमः॥ हरिः॥ ॐ म॥ एषः। ते। निर्ऋत इति निःऽ १
ऋते। भागः। तम्। जुषस्व। स्वाहा॥ अग्निनेत्रेभ्य इत्यग्निऽनेत्रेभ्यः। देवेभ्यः। पु
रस्सद्भ्य इति पुरःसत्ऽभ्यः। यमनेत्रेभ्य इति यमऽनेत्रेभ्यः। दक्षिणसद्भ्य इति
दक्षिणसत्ऽभ्यः। विश्वदेवनेत्रेभ्य इति विश्वदेवऽनेत्रेभ्यः। पश्चात्सद्भ्य इ
ति पश्चात्सत्ऽभ्यः। मित्रावरुणनेत्रेभ्य इति मित्रावरुणऽनेत्रेभ्यः। वा। मरुन्ने
त्रेभ्य इति मरुत्ऽनेत्रेभ्यः। वा। उत्तरसद्भ्य इत्युत्तरसत्ऽभ्यः। सोमनेत्रेभ्य
इति सोमऽनेत्रेभ्यः। देवेभ्यः। उपरिसद्भ्य इत्युपरिसत्ऽभ्यः। दुवस्वद्भ्य इति दु
वस्वत्ऽभ्यः। स्वाहा॥ ॥१॥ ये। देवाः। अग्निनेत्रा इत्यग्निऽनेत्राः। पुरस्सद इति

श्री पुरःऽसदः। यमनेत्रा इति यमऽनेत्राः। दक्षिणसद इति दक्षिणऽसदः। विश्वदेवनेत्रा इ
ति विश्वदेवऽनेत्राः। पश्चात्सद इति पश्चातऽसदः। मित्रावरुणनेत्रा इति मित्रावरु
णऽनेत्राः। वा। मरुन्नेत्र इति मरुतऽनेत्राः। वा। उत्तरसद इत्युत्तरऽसदः। सोमनेत्रा इति
सोमऽनेत्राः। उपरिसद इत्युपरिऽसदः। दुवस्वन्तः। तेभ्यः। स्वाहा॥ ॐ॥ २॥ अग्ने।
सहस्व। पृतनाः। अभिमातीरित्यभिऽमातीः। अप। अस्य। दुष्टरः। दुस्तर इति दुस्त
रः। तरन्। अरातीः। वर्चः। धाः। यज्ञवाहसीति यज्ञऽवाहसि॥ ॐ॥ ३॥ उपांशो
रित्युपऽअंशोः। वीर्येण। जुहोमि। हतम्। रक्षः। स्वाहा। रक्षसाम्। त्वा। वधाय। अ
वधिष्म। रक्षः। अमुष्य। त्वा। वधाय। अमुम्। अवधिष्म। जुषाणः। अप्तुः। आज्य
स्य। वेतु। स्वाहा॥ पा॥४॥ ६॥ ॥अपः। देवाः। मधुमतीरिति मधुऽमतीः। अगृभ्णन्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊर्ज्जस्वतीः। राजस्वइति राजऽस्वः। चितानाः। याभिः। मित्रावरुणौ। अभि। असिञ्चन्। या
भिः। इन्द्रम्। अनयन्। अति। अरातीः। स्त्रैं॥१॥ वृष्णः। ऊर्म्मिः। असि। राष्ट्रदाइति रा
ष्ट्रऽदाः। राष्ट्रम्। मे। देहि। स्वाहा। वृष्णः। ऊर्म्मिः। असि। राष्ट्रदाइति राष्ट्रऽदाः। राष्ट्रम्।
२ अमुष्मै। देहि। वृषसेनइति वृषऽसेनः॥ ॥२॥ अर्थेतइत्यर्थऽइतः। ओजस्वतीः।
आपः। परिवाहिणीः। परिवाहिनीरिति परिऽवाहिनीः। अपाम्। पतिः। अपाम्। ग
र्भः। सूर्य्यवर्चसइति सूर्य्यऽवर्चसः। सूर्य्यत्वचइति सूर्य्यऽत्वचः। व्रजक्षित २
इति व्रजऽक्षितः। वाशाः। मांदाः। शक्करीः। जनभृतइति जनऽभृतः। विश्वभृ
तइति विश्वऽभृतः। शविष्ठाः। आपः। स्वाराज्ञीः। स्वराज्ञीरिति स्वऽराज्ञीः।
स्थ। राष्ट्रदाइति राष्ट्रऽदाः। राष्ट्रम्। अमुष्मै। दत्त॥ ईं॥३॥ सम्। मधुमतीरिति मधुऽ

मतीः। मधुमतीभिरिति मधुऽमतीभिः। पृच्यन्ताम्। महि। क्षत्रम्। क्षत्रियाय। वन्वा
नाः। अनाधृष्टाः। सीदत। सह। ओजसा। महि। क्षत्रम्। क्षत्रियाय। दधतीः॥ ॥४॥ छीं॥
॥ ॥सविता। त्वा। प्रसवानामिति प्रऽसवानाम्। सुवताम्। अग्निः। गृहपतीनामि
ति गृहऽपतीनाम्। सोमः। वनस्पतीनाम्। बृहस्पतिः। वाचः। इन्द्रः। ज्यैष्ठ्याय।
रुद्रः। पशूनाम्। मित्रः। सत्यः। वरुणः। धर्म्मपतीनामिति धर्म्मऽपतीनाम्॥ ॥
॥१॥ इमम्। देवाः। असपत्नम्। सुवध्वम्। महते। क्षत्राय। महते। ज्यैष्ठ्याय।
इमम्। अमुम्। अमुष्य। पुत्रम्। अमुष्यै। पुत्रम्। अस्यै। विशे॥ षं॥२॥
एषः। वः। कुरवः। राजा। एषः। वः। पञ्चालाः। राजा। सोमः। अस्माकम्। ब्रा
ह्मनाम्। राजा॥ प्रिं॥३॥ छीं॥ सोमस्य। त्विषिः। असि। अग्नये। स्वाहा। सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोया। सवित्रे। सरस्वत्यै। पूष्णे। बृहस्पतये॥ ॐ॥ १॥ इन्द्राय। अंशाय। श्लोका
य। घोषाय। भगाय। अर्यम्णे। अनिभृष्टमित्यनिऽभृष्टम्। असि। वाचः। बं
धुः। तपोजा इति तपःऽजाः। सोमस्य। दात्रम्। असि। स्वाहा। राजस्व इति
३ राजःऽस्व॥ ॐ॥ २॥ सधमाद इति सधऽमादः। द्युम्निनीः। आपः। एताः। अ ३
नाधृष्टाः। अपस्यः। वसानाः। पस्त्यासु। चक्रे। वरुणः। सधस्थमिति सधऽ
स्थम्। अपाम्। शिशुः। मातृतमास्विति मातृऽतमासु। अंतरित्यंतः॥ ॐ॥ ३॥
क्षत्रस्य। उल्बम्। जरायुञ्जाभिः। योनिः। इन्द्रस्य। वार्त्रघ्नमिति वार्त्रऽघ्नम्।
असि। त्वया। अयम्। वृत्रम्। वध्यात्। मित्रस्य। असि। वरुणस्य। असि॥ रेवं॥
॥ ४॥ रुजो। दृबा। क्षुपा। पात। एनम्। प्रांचम्। प्रत्यंचम्। तिर्यंचम्। दिगभ्य

इति दिक्ऽभ्यः। पात॥ ॐ॥ ५॥ आविः। मर्याः। आवित्त इत्याऽवित्तः। अग्निः। गृहप
तिरिति गृहऽपतिः। इन्द्रः। वृद्धश्रवा इति वृद्धऽश्रवाः। पूषा। विश्ववेदा इति विश्वऽ
वेदाः। आवित्ता इत्याऽवित्तौ। मित्रावरुणौ। धृतव्रता इति धृतऽव्रतौ। आवित्ते इ
त्याऽवित्ते। द्यावापृथिवी इति द्यावापृथिवी। विश्वशंभू इति विश्वऽशंभू। आ
वित्तेत्याऽवित्ता। अदितिः। उरुशर्मेत्युरुऽशर्म्मा॥ ॐ॥ ६॥ द्याछि॥ ॥ अवेष्टा इत्य
वऽइष्टाः। दन्दशूकाः। प्राचीम्। आ। रोह। गायत्री। त्वा। अवतु। रथंतरमिति रथम्ऽ
तरम्। साम। त्रिवृदिति त्रिऽवृत्। स्तोमः। वसंतः। ऋतुः। ब्रह्म। द्रविणम्॥ ॐ॥ ७॥
दक्षिणाम्। आ। रोह। त्रिष्टुप्। त्रिस्तुबिति त्रिऽस्तुप्। त्वा। अवतु। बृहत्। साम। पंचद
श इति पंचऽदशः। स्तोमः। ग्रीष्मः। ऋतुः। क्षत्रम्। द्रविणम्॥ ॐ॥ ८॥ प्रतीचीम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ। रोह। जगती। त्वा। अवतु। वैरूपम्। साम। सप्तदश इति सप्तऽदशः। स्तोमः। वर्षाः।
ऋतुः। विट्। द्रविणम्॥ घं॥ उदीचीम्। आ। रोह। अनुष्टुप्। अनुस्तुबित्यनुऽस्तुप्।
त्वा। अवतु। वैराजम्। साम। एकविंश इत्येकऽविंशः। स्तोमः। शरत्। ऋतुः। फल
म्। द्रविणम्॥ जं॥ ५॥ ऊर्ध्वाम्। आ। रोह। पङ्क्तिः। त्वा। अवतु। शाक्वररैवते इति शाक्वर
॥४॥ रैवते। सामनी इति सामनी। त्रिणवत्रयस्त्रिंशौ। त्रिनवत्रयस्त्रिंशा इति त्रिन ॥४॥
वत्रयस्त्रिंशौ। स्तोमौ। हेमंतशिशिरौ। ऋतू इति ऋतू। वर्चः। द्रविणम्। प्रत्यस्त
मिति प्रतिऽअस्तम्। नमुचेः। शिरः॥ भे॥ ६॥ सोमस्य। त्विषिः। असि। तवेवेति
तवऽइव। मे। त्विषिः। भूयात्। मृत्योः। पाहि। ओजः। सहः। अमृतम्। असि॥ क्षी॥ ७॥
हिरण्यरूपा इति हिरण्यऽरूपा। उषसः। विरोक इति विऽरोके। उभौ। इंद्रौ। उत्। इतः।

सूर्यः। च। आ। रोहतम्। वरुण। मित्र। गर्त्तम्। ततः। चक्षाथाम्। अदितिम्। दितिम्। च।
मित्रः। असि। वरुणः। असि॥ श्री॥ ७॥ छी॥ सोमस्य। त्वा। द्युम्नेन। अभि। सिंचा
मि। अग्नेः। भ्राजसा। सूर्यस्य। वर्चसा। इंद्रस्य। इंद्रियेण। मरुताम्। ओजसा। क्ष
त्राणाम्। क्षत्रपतिरिति क्षत्रऽपतिः। एधि। अति। दिद्यून्। पाहि। जानेराज्यायेति
जानेऽराज्याय॥ ॥९॥ इमं देवाः। ईत॥ १०॥ एष वः॥ ईतेः॥ प॥ ११॥ प्र। पर्वतस्य। वृ
षभस्य। पृष्ठात्। नावः। चरंति। स्वसिच इति स्वऽसिचः। इयानाः॥ ताः। आ। अ
ववृत्रन्। अधराक्। उदक्। ताः। अहिम्। बुध्न्यम्। अनु। रीयमाणाः। विष्णोः। वि
क्रमणमिति विऽक्रमणम्। विक्रांतमिति विऽक्रांतम्। क्रांतम्। असि॥ ॥४॥ प्रजा
पत इति प्रजाऽपते। न। त्वत्। एतानि। अन्यः। विश्वा। रूपाणि। परि। ता। बभूव।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्कामा इति यत्ऽकामाः। ते। जुहुमः। तत्। नः। अस्तु। वयम्। स्याम। पतयः। रयीणाम्॥ ॥५॥
रुद्र। यत्। ते। क्रिवि। परम्। नाम। तस्मै। हुतम्। असि। अमेष्टमित्यमाऽइष्टम्। असि।
स्वाहा॥ पिं॥ ध्या॥ इंद्रस्य। वज्रः। असि। मित्रावरुणयोः। त्वा। प्रशास्त्रोरिति प्रऽ
शास्त्रोः। प्रशिषेति प्रऽशिषा। युनज्मि। अव्यथायै। त्वा। स्वधायै। त्वा। अरिष्टः। फ ॥५॥
॥५॥ ल्गुनः। मरुताम्। प्रसवेनेति प्रऽसवेन। जय। आपाम। मनसा। सम्। इंद्रियेण। ण॥१॥
मा। तोहंद्रा। ते। वयम्। तुराषाट्। अयुक्तासः। अब्रह्मता। वि। दसाम। तिष्ठ। रथम्।
अधि। यत्। वज्रहस्तेति वज्रऽहस्त। आ। रश्मीन्। देव। युवसे। स्वश्वानिति सुऽ
अश्वान्॥ ...॥ २॥ अग्नये। गृहपतय इति गृहऽपतये। स्वाहा। सोमाय। वनस्पत
ये। इंद्रस्य। इंद्रियाय। मरुताम्। ओजसे। पृथिवि। मातः। मा। मा। हिंसीः। मो इति मो।

अहम्। त्वाम्। पिं॥ ३॥ हंसः। शुचिषत्। शुचिसदिति शुचिऽसत्। वसुः। अंतरिक्षस
दित्यंतरिक्षऽसत्। होता। वेदिसदिति वेदिऽसत्। अतिथिः। दुरोणसदिति दुरोणऽ
सत्। नृषत्। नृसदिति नृऽसत्। वरसदिति वरऽसत्। ऋतसदित्यृतऽसत्। व्यो
मसदिति व्योमऽसत्। अब्जा इत्यप्ऽजाः। गोजा इति गोऽजाः। ऋतजा इत्यृतऽजाः।
अद्रिजा इत्यद्रिऽजाः। ऋतम्। बृहत्॥ पिं॥ ३॥ ४॥ इयत्। असि। आयुः। असि। आ
युः। मे। देहि। युङ्। असि। वर्चः। असि। वर्चः। मे। देहि। ऊर्क्। असि। ऊर्जम्। मयि।
धेहि। इंद्रस्य। वाम्। बाहू इति बाहू। वीर्यकृता इति वीर्यऽकृतौ। उपावहरामीत्यु
पऽअवहरामि। दुः॥ ५॥ ६॥ ॥ स्योना। असि। सुषदा। सुसदेति सुऽसदा। क्षत्र
स्य। योनिः। असि। स्योनाम्। आ। सीद। सुषदाम्। सुसदामिति सुऽसदाम्। क्षत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्स्य। योनिम्। आ। सीद॥ चुं॥१॥ नि। ससाद। धृतव्रत इति धृतऽव्रतः। वरुणः। पस्त्यासु।
आ। साम्राज्यायेति साम्ऽराज्याय। सुक्रतुरिति सुऽक्रतुः॥ डो॥२॥ अभिभूरित्यभिऽ
भूः। असि। अयानाम्। एताः। ते। पञ्च। दिशः। कल्पन्ताम्। ब्रह्मन्। त्वम्। ब्रह्मा।
॥६॥ असि॥ ष्पिं॥३॥ सविता। असि। सत्यप्रसव इति सत्यऽप्रसवः। वरुणः। सत्यौजा
इति सत्यऽओजाः। इन्द्रः। विशौजाः। रुद्रः। सुशेव इति सुऽशेवः॥ प्रो॥४॥ प्रियङ्करे ॥६॥
ति प्रियम्ऽकर। श्रेयस्कर। श्रेयःकरेति श्रेयःऽकर। भूयस्कर। भूयःकरेति
भूयःऽकर। इन्द्रस्य। वज्रः। असि। तेन। मे। रध्य॥ ॥५॥ अग्निः। पृथुः। धर्म्म
णः। पतिः। जुषाणः। अग्निः। पृथुः। धर्मणः। पतिः। आज्यस्य। हविषः। वेतु। स्वा
हा। स्वाहाकृता इति स्वाहाऽकृताः। सूर्य्यस्य। रश्मिभिरिति रश्मिऽभिः। यतध्वम्।

सजातानामिति सऽजातानाम्। मध्यमेष्ठ्याय। मध्यमेस्थ्यायेति मध्यमेऽस्थ्याय॥ पों॥६॥ ६॥
॥ सवित्रा। प्रसवित्रेति प्रऽसवित्रा। सरस्वत्या। वाचा। त्वष्ट्रा। रूपैः। पूष्णा। प
शुभिरिति पशुऽभिः। इन्द्रेण। अस्मे॥ छं॥१॥ बृहस्पतिना। ब्रह्मणा। वरुणेन।
ओजसा। अग्निना। तेजसा। सोमेन। राज्ञा। विष्णुना। देवतया। दशम्या। इमम्।
यज्ञम्। विष्णुम्। आप्नवानि॥ डुं॥२॥ अश्विभ्यामित्यश्विऽभ्याम्। पच्य
स्व। सरस्वत्यै। इन्द्राय। सुत्राम्ण इति सुऽत्राम्णे। पच्यस्व। वायोः। पूतः। पवि
त्रेण। प्रत्यङ्। सोमः। अतिस्रुत इत्यतिऽस्रुतः॥ इन्द्रस्य। युज्यः। सखा॥ णूं॥१॥
कुवित्। अङ्ग। यवमन्त इति यवऽमन्तः। यवम्। चित्। यथा। दान्ति। अनुपूर्वमि
त्यनुऽपूर्वम्। वियूयेति विऽयूय॥ इहेहेतीहऽइह। एषाम्। कृणुहि। भोजनानि।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये। बृहिंषः॥ नमुक्तिमितिनमः॥उक्तिम्॥ना। अगमुः। अश्विभ्यामित्यश्विभ्याम।
त्वा। सरस्वत्यै॥ इंद्राय। सुत्राम्ण इतिसुऽत्राम्णे॥ ॥२॥ युवम्। सुरामम्। अश्विना। नमुचौ। आसुरे। सचा। विपिपानेति विऽपिपाना। शुभः। पती इतिपती। इंद्रम्।
कर्मस्वितिकर्मऽसु। आवतम्। टिं॥ ३॥ पुत्रमिवेतिपुत्रम्ऽइव। पितरौ। अश्विना।
॥८॥ उभा। इंद्र। आवथुः। काव्यैः। दंसनाभिः। यत्। सुरामम्। वि। अपिबः। शचीभिः।
सरस्वती। त्वा। मघवन्नितिमघऽवन्। अभिष्णक्॥ स्रौं॥ ४॥ छि॥ ॥एवते॥४॥ ॥८॥
अपोदेवा॥४॥ सविता त्वा॥३॥ सोमस्यत्विषि॥६॥ अवेष्टा॥७॥ सोमस्यत्वा॥६॥
इंद्रस्यवज्रो॥५॥ स्योनासि॥६॥ सविता॥२॥ अश्विभ्या॥४॥ ॥दशानुवा
केषुसप्तचत्वारिंशत्॥ एषतेतजोसि॥४७॥ अर्पेत॥ ऊर्जस्वतीरापः। अपा

म्पतिरस्यपाङ्क्तः। सूर्यवर्चसस्यसूर्यत्वचः। व्रजक्षितोवाशाः। मांदाः। शक्करीः। ज
नभृतोविश्वभृतः। रौद्राआपः॥ ॥द्वितिदशकप्रथमोध्यायः॥ [illegible] ॥ ओम्॥ युञ्जा
नः। प्रथमम्। मनः। तत्त्वाय। सविता। धियः। अग्नेः। ज्योतिः। निचाय्येति निऽचाय्य।
पृथिव्याः। अधि। आ। अभरत्॥ क्रौं॥ १॥ युक्तेन। मनसा। वयम्। देवस्य। सवितुः। स
वै। स्वर्ग्यायेति स्वःऽगेयाय। शक्त्या॥ रवौ॥ २॥ युक्त्वाय। सविता। देवान्। स्वः। यतः।
धिया। दिवम्॥ बृहत्। ज्योतिः। करिष्यतः। सविता। प्र। सुवाति। तान्॥ ह्यं॥ ३॥ युञ्जते
मनः॥ य॥ ई॥ ०॥ ५॥ युजे। वाम्। ब्रह्म। पूर्व्यम्। नमोभिरितिनमःऽभिः। वि। श्लोकः।
एतु। पथ्येवेतिपथ्याऽइव। सूरेः। शृण्वंतु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धामा
नि। दिव्यानि। तस्थुः॥ ब्रैं॥ ५॥ यस्य। प्रयाणम्। प्रयानमितिप्रऽयानम्। अनु। अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८

अन्योइत्। ययुः। देवाः। देवस्य। महिमानम्। ओजसा॥ यः। पार्थिवानि। विममइति विऽ
ममे। सः। एतशः। रजांऽसि। देवः। सविता। महित्वनेति महिऽत्वना॥ द्रो॥ ६॥ देव। सवि
तरिति सवितः। प्रासुव। यज्ञम्। प्रासुव। यज्ञपतिमिति यज्ञऽपतिम्। भगायो॥ यज्ञऽ
पतिम्। भगाय॥ दिव्यः। गंधर्वः। केतपूरिति केतऽपूः। केतम्। नः। पुनातु। वाचः। पतिः।
वाचम्। नः। स्वदतु॥ त्राः॥ ७॥ इमम्। नः। देव। सवितः। यज्ञम्। प्रानय। देवाव्यमिति
देवऽअव्यम्। सखिविदमिति सखिऽविदम्। सत्राजितमिति सत्राऽजितम्। धन
जितमिति धनऽजितम्। स्वर्जितमिति स्वःऽजितम्। ऋचा। स्तोमम्। सम्। अर्द्ध
य। गायत्रेण। रथंतरमिति रथम्ऽतरम्। बृहत्। गायत्रवर्त्तनीति गायत्रऽवर्त्तनि।
स्वाहा॥ त्राः॥ ८॥ देवस्य। त्वा। आ। ई। अर्द्धर्चिगणंत॥ आ। ददे। गायत्रेण। छंदसा। अङ्गि

८

स्वत्। पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अङ्गिरस्वत्। आ। भर। त्रैष्टुभे
न। त्रैष्टुभेनेति त्रैस्तुभेन। छंदसा। अङ्गिरस्वत्॥ त्रा॥ ९॥ अभ्रिः। असि। नारी। असि। त्व
या। वयम्। अग्निम्। शकेम। खनितुम्। सधस्थ इति सधऽस्थे। आ। जागतेन। छंदसा।
अङ्गिरस्वत्॥ कं॥ १०॥ हस्ते। आधाय। आधायेत्याऽधाय। सविता। बिभ्रत्। अभ्रिम्। हिरण्य
यीम्॥ अग्नेः। ज्योतिः। निचाय्येति निऽचाय्य। पृथिव्याः। अधि। आ। अभरत्। आ
नुष्टुभेन। आनुष्टुभेनेत्यानुऽस्तुभेन। छंदसा। अङ्गिरस्वत्॥ ङि॥ ११॥ छि॥ ॥
प्रतूर्त्तमिति प्रऽतूर्त्तम्। वाजिन्। आ। द्रव। वरिष्ठाम्। अनु। संवतमिति समऽवतम्॥
दिवि। ते। जन्म। परमम्। अंतरिक्षे। तव। नाभिः। पृथिव्याम्। अधि। योनिः। इत्॥
॥ द्रो॥ १॥ युञ्जाथाम्। रासभम्। युवम्। अस्मिन्। यामे। वृषण्वसू इति वृषण्ऽवसू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसु॥ अग्निम्। भरंतम्। अस्मयुमित्यस्मऽयुम्। चो॥ ३॥ योगेयोग इति योगेऽयोगे। त
वस्तरमिति तवःऽतरम्। वाजेवाज इति वाजेऽवाजे। हवामहे॥ सखायः। इंद्रम्। ऊतये। ठे॥ ३॥
प्रतूर्वन्निति प्रऽतूर्वन्। आ। इहि। अवक्रामन्नित्यवऽक्रामन्। अशस्तीः। रुद्रस्य।
गाणपत्यमिति गाणऽपत्यम्। मयोभूरिति मयःऽभूः। आ। इहि। उरु। अंतरिक्षम्। वि।
॥ १ ॥ इहि। स्वस्तिगव्यूतिरिति स्वस्तिऽगव्यूतिः। अभयानि। कृण्वन्। पूष्णा। सयुजेति
सऽयुजा। सह॥ घ्नं॥ ४॥ पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। ॥ १ ॥
अङ्गिरस्वत्। आ। भर। अग्निम्। भरिष्यामः॥ गं॥ ५॥ अनु। अग्निः। उषसाम्। अ
ग्रम्। अक्ख्यत्। अनु। अहानि। प्रथमः। जातवेदा इति जातऽवेदाः॥ अनु। सूर्यस्य।
पुरुत्रेति पुरुऽत्रा। रश्मीन्। अनु। द्यावापृथिवी इति द्यावापृथिवी। आ। ततंथ॥ ओं॥ द्ध॥

आगत्येत्याऽगत्य। वाजी। अध्वानम्। सर्वाः। मृधः। वि। धूनुते॥ अग्निम्। सधस्थ इति स
धऽस्थे। महति। चक्षुषा। नि। चिकीषते॥ छी॥ ७॥ आक्रम्येत्याऽक्रम्य। वाजिन्। पृथि
वीम्। अग्निम्। इच्छ। रुचा। त्वम्॥ भूम्याः। वृत्वाय। नः। ब्रूहि। यतः। खनेम। तम्। वयम्॥
॥ यंग॥ ८॥ द्यौः। ते। पृष्ठम्। पृथिवी। सधस्थमिति सधऽस्थम्। आत्मा। अंतरिक्षम्। समु
द्रः। योनिः॥ विख्यायेति विऽख्याय। चक्षुषा। त्वम्। अभि। तिष्ठ। पृतन्यतः॥ सुं॥ ९॥
उत्। क्राम। महते। सौभगाय। अस्मात्। आस्थानादित्याऽस्थानात्। द्रविणोदा इति द्रवि
णःऽदाः। वाजिन्॥ वयम्। स्याम। सुमताविति सुऽमतौ। पृथिव्याः। अग्निम्। खनंतः। उप
स्थ इत्युपऽस्थे। अस्याः॥ न्ये॥ १०॥ उत्। अक्रमीत्। द्रविणोदा इति द्रविणःऽदाः। वाजी।
अर्वा। अकरित्यकः। सु। लोकम्। सुकृतमिति सुऽकृतम्। पृथिव्याम्॥ ततः। खनेम। सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतीकमितिसुऽप्रतीकम्। अग्निम्। स्वरितिस्वः। रुहाणाः। अधि। नाकम्। उत्तममित्युत्ऽ
तमम्॥ क्रौं॥११॥ आ। त्वा। जिघर्मि। मनसा। घृतेन। प्रतिक्षियन्तमितिप्रतिऽक्षियन्तम्।
भुवनानि। विश्वा। पृथुम्। तिरश्चा। वयसा। बृहन्तम्। व्यचिष्ठम्। अन्नैः। रभसम्।
दृशानम्॥ किं॥१२॥ आ। विश्वतः। प्रत्यञ्चम्। जिघर्मि। अरक्षसा। मनसा। तत्। जु
॥१०॥ षेत॥ मर्यश्रीरिति मर्यऽश्रीः। स्पृहयद्वर्ण इति स्पृहयत्ऽवर्णः। अग्निः। न। अभि
मृशे इत्यभिऽमृशे। तन्वा। जर्भुराणः॥ णं॥१३॥ परि। वाजपतिरिति वाजऽपतिः। १०
कविः। अग्निः। हव्यानि। अक्रमीत्। दधत्। रत्नानि। दाशुषे॥ गो॥१४॥ परि। त्वा।
अग्ने। पुरम्। वयम्। विप्रम्। सहस्य। धीमहि। धृषद्वर्णमिति धृषत्ऽवर्णम्। दि
वेदिव इति दिवेऽदिवे। भेत्तारम्। भंगुरावताम्। भङ्गुरवतामिति भङ्गुरऽवताम्॥ लिं॥१५॥

त्वम्। अग्ने। द्युभिरिति द्युऽभिः। आशुशुक्षणिः। अद्भ्य इत्यत्ऽभ्यः। अश्मनः। परि। वनेभ्यः।
ओषधीभ्यः। नृणाम्। नृपत इति नृऽपते। जायसे। शुचिः॥ द्रं॥१६॥ छ॥ ॥ देवस्य त्वा॥
इत्यर्द्धर्चगणं त॥ पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अङ्गि
रस्वत्। खनामि। ज्योतिष्मन्तम्। त्वा। अग्ने। सुप्रतीकमिति सुऽप्रतीकम्। अजस्रे
ण। भानुना। दीद्यतम्॥ शिवम्। प्रजाभ्य इति प्रऽजाभ्यः। अहिंसन्तम्। पृथिव्याः।
सधस्थादिति सधऽस्थात्। अग्निम्। पुरीष्यम्। अङ्गिरस्वत्। खनामः॥ धिः॥१॥
अपाम्। पृष्ठम्। असि। योनिः। अग्नेः। समुद्रम्। अभितः। पिन्वमानम्। वर्द्धमानः।
महान्। आ। च। पुष्करे। दिवः। मात्रया। वरिम्णा। प्रथस्व॥ त्यैः॥२॥ शर्म। च। स्थः। व
र्म। च। स्थः। अछिद्रे इत्यछिद्रे। बहुले इति बहुलेऽउभे इत्युभे॥ व्यचस्वती इति व्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

-चस्वती।सम्।वसाथाम्।भृतमम्।अग्निम्।पुरीष्यम्॥पूं॥३॥सम्।वसाथाम्।स्वर्विदि
ति स्वः॒ऽविदा।समीचीइति समीची।उरसा।त्मना॥अग्निम्।अंतः।भरिष्यतीइति भरि
ष्यंती।ज्योतिष्मंतम्।अजस्रम्।इत्॥पुरीष्यः।असि।विश्वभराइति विश्वऽभराः।
अथर्वा।त्वा।प्रथमः।निः।अमन्थत्।अग्ने॥त्रीः॥४॥त्वाम्।अग्ने।पुष्करात्।अधि।अ
॥११॥ थर्वा।निः।अमंथत॥मूर्ध्नः।विश्वस्य।वाघतः॥सः॥घ्नातम्।उं॒ऽइं॒स्यूं।त्वा।दध्याङ्। ॥११॥
ऋषिः।पुत्रः।ईधे।अथर्वणः॥वृत्रहणम्।वृत्रहनमिति वृत्रऽहनम्।पुरंदरमिति पुर
म्ऽदरम्॥डं॥घ्नातम्।उंऽइंस्यूं।त्वा।पाथ्यः।वृषा।सम्।ईधे।दस्युहंतममिति दस्युह
न्ऽतमम्॥धनंजयमिति धनम्ऽजयम्।रणेरणइति रणेऽरणे॥तं॥७॥सीद।होत
रिति होतः।स्वे।उंऽइंसूं।लोके।चिकित्वान्।सादय।यज्ञम्।सुकृतस्येति सुऽकृतस्य।

योनौ॥देवावीरिति देवऽअवीः।देवान्।हविषा।यजासि।अग्ने।बृहत्।यजमाने।वयः।
धाः॥द्वौ॥८॥नि।होता।होतृषदने।होतृसदनइति होतृऽसदने।विदानः।त्वेषः।दीदि
वानिति दीदिऽवान्।असदत्।सुदक्षइति सुऽदक्षः।अदब्धव्रतप्रमतिरित्यदब्धव्रत
प्रमतिः।वसिष्ठः।सहस्रम्भरइति सहस्रम्ऽभरः।शुचिजिह्वइति शुचिऽजिह्वः।अग्निः॥
॥म्रीः॥९॥सम्।सीदस्व।महान्।असि।शोचस्व।देववीतमइति देवऽवीतमः॥वि।धू
मम्।अग्ने।अरुषम्।मियेध्य।सृज।प्रशस्तेति प्रऽशस्त।दर्शतम्॥च्युं॥१०॥छ॥ ॥
अपः।देवीः।उप।सृज।मधुमतीरिति मधुऽमतीः।अयक्ष्माय।प्रजाभ्यइति प्रऽजा
भ्यः।तासाम्।आस्थानात्।इति आऽस्थानात्।उत्।जिहताम्।ओषधयः।सुपिप्पलाइति
सुऽपिप्पलाः॥त्री॥११॥सम्।ते।वायुः।मातरिश्वा।दधातु।उत्तानायाः।हृदयम्।यत्।वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्त्वमिति कऽस्त्वम्॥ यः। देवानाम्। चरसि। प्राणथेन। कस्मै। देव। वषट्। अस्तु। तुभ्यम्॥ गं॥ २॥
सुजात इति सुऽजातः। ज्योतिषा। सह। शर्म्म। वरूथम्। आ। असदत्। स्वरिति स्वः॥ वासः।
अग्ने। विश्वरूपमिति विश्वऽरूपम्। सम्। व्ययस्व। विभावसो इति विभाऽवसो॥ ठुं॥ ३॥
उत्। ऊं इति। तिष्ठ। सुअध्वरेति सुऽअध्वर। अव। नः। देव्या। धिया॥ दृशे। च। भासा। बृ
॥१२॥ हता। सुशुक्वनिरिति सुऽशुक्वनिः। आ। अग्ने। याहि। सुशस्तिभिरिति सुशस्तिऽ ॥१२॥
भिः॥ दें॥ ४॥ ऊर्ध्वः। ऊं इति। सु। नः। ऊतये। तिष्ठ। देवः। न। सविता। ऊर्ध्वः। वाजस्य। सनि
ता। यत्। अञ्जिभिरित्यञ्जिऽभिः। वाघद्भिरिति वाघत्ऽभिः। विह्वयामह इति वि
ह्वयामहे॥ त्रें॥ ५॥ सः। जातः। गर्भः। असि। रोदस्योः। अग्ने। चारुः। विभृत इति वि
भृतः। ओषधीषु। चित्रः। शिशुः। परि। तमांसि। अक्तून्। प्र। मातृभ्य इति मातृ

भ्यः। अधि। कनिक्रदत्। गाः॥ झौ॥ ६॥ स्थिरः। भव। वीड्वङ्ग इति वीडुऽअङ्गः। आशुः। भव। वाजी।
अर्वन्। पृथुः। भव। सुषदः। सुसद इति सुऽसदः। त्वम्। अग्नेः। पुरीषवाहणः। पुरीषवाह
न इति पुरीषऽवाहनः॥ ट्रीं॥ ७॥ शिवः। भव। प्रजाभ्य इति प्रऽजाभ्यः। मानुषीभ्यः।
त्वम्। अङ्गिरः॥ मा। द्यावापृथिवी इति द्यावापृथिवी। अभि। शोचीः। मा। अन्तरिक्षम्।
मा। वनस्पतीन्॥ ञ्जुं॥ ८॥ प्र। एतु। वाजी। कनिक्रदत्। नानदत्। रासभः। पत्वा। भरन्।
अग्निम्। पुरीष्यम्। मा। पादि। आयुषः। पुरा॥ ष्पुं॥ ९॥ वृषा। अग्निम्। वृषणम्। भ
रन्। अपाम्। गर्भम्। समुद्रियम्। अग्ने। आ। याहि। वीतये॥ ऋतम्। सत्यम्। ऋत
म्। सत्यम्। अग्निम्। पुरीष्यम्। अङ्गिरस्वत्। भरामः॥ रेयों॥ १०॥ ओषधयः। प्रति। मो
दध्वम्। अग्निम्। एतम्। शिवम्। आयन्तमित्याऽयन्तम्। अभि। अत्र। युष्माः॥ व्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नितिविऽअस्यन्॥ विश्वाः। अनिराः। अमीवाः। निषीदन्। निसीदन्निति निऽसीदन्। नः।
अप। दुर्म्मतिमिति दुःऽमतिम्। जहि॥ श्रौं॥११॥ ओषधयः। प्रति। गृभ्णीत। पुष्पवती
रिति पुष्पऽवतीः। सुपिप्पला इति सुऽपिप्पलाः। अयम्। वः। गर्भः। ऋत्वियः। प्रत्नम्।
सधस्थमिति सधऽस्थम्। आ। असदत्॥ द्री॥१२॥ विपाजसा। पृथुना। शोशुचानः।
॥१२ बाधस्व। द्विषः। रक्षसः। अमीवाः। सुशर्म्मण इति सुऽशर्म्मणः। बृहतः। शर्म्मणि। स्या ॥१२
म्। अग्नेः। अहम्। सुहवस्येति सुऽहवस्य। प्रणीतौ। प्रनीताविति प्रऽनीतौ॥ द्रं॥१३॥ छा। ॥
आपः। हि। स्थ। मयोभुव इति मयःऽभुवः। ताः। नः। ऊर्जे। दधातन। महे। रणाय। च
क्षसे॥ ङ्गां॥१॥ यः। वः। शिवतम इति शिवऽतमः। रसः। तस्य। भाजयत। इह। नः। उश
तीरिवेत्युशतीःऽइव। मातरः॥ छं॥२॥ तस्मै। अरम्। गमाम। वः। यस्य। क्षयाय। जिन्व

थ। आपः। जनयथ। च। नः॥ सां॥३॥ मित्रः। संसृज्येति सम्ऽसृज्य। पृथिवीम्। भू
मिम्। च। ज्योतिषा। सह। सुजातमिति सुऽजातम्। जातवेदसमिति जातऽवेदसम्।
अयक्ष्माय। त्वा। सम्। सृजामि। प्रजाभ्य इति प्रऽजाभ्यः॥ थुं॥४॥ रुद्राः। सं
सृज्येति सम्ऽसृज्य। पृथिवीम्। बृहत्। ज्योतिः। सम्। ईधिरे। तेषाम्। भानुः। अज
स्रः। इत्। शुक्रः। देवेषु। रोचते॥ हुं॥५॥ संसृष्टामिति सम्ऽसृष्टाम्। वसुभिरिति
वसुऽभिः। रुद्रैः। धीरैः। कर्म्मण्याम्। मृदम्। हस्ताभ्याम्। मृद्वीम्। कृत्वा। सिनीवा
ली। कृणोतु। ताम्॥ जिं॥६॥ सिनीवाली। सुकपर्देति सुऽकपर्दा। सुकुरीरेति सुऽकुरी
रा। स्वौपशेति सुऽओपशा। सा। तुभ्यम्। अदिते। महि। आ। उखाम्। दधातु। हस्तयोः॥
॥टिं॥७॥ उखाम्। कृणोतु। शक्त्या। बाहुभ्यामिति बाहुऽभ्याम्। अदितिः। धिया॥ माता।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रम्।यथा।उपस्थ इत्युपऽस्थे।सा।अग्निम्।बिभर्तु।गर्भे।आ।।चूं।।८।।मखस्य।शिरः।
असि।वसवः।त्वा।कृण्वंतु।गायत्रेण।छंदसा।अंगिरस्वत्।ध्रुवा।असि।पृथिवी।अ
सि।धारय।मयि।प्रजामिति प्रऽजाम्।रायः।पोषम्।गौपत्यम्।सुवीर्यमिति सुऽवी
र्यम्।सजातानिति सऽजातान्।यजमानाय।रुद्राः।त्रैष्टुभेन।त्रैस्तुभेनेति त्रैस्तुभेन।
१४ अंतरिक्षम्।आदित्याः।जागतेन।द्यौः।विश्वे।त्वा।देवाः।वैश्वानराः।कृण्वंतु।आ १४
नुष्टुभेन।आनुस्तुभेनेत्यानुऽस्तुभेन।छंदसा।अंगिरस्वत्।ध्रुवा।असि।दिशः।
असि।अदित्यै।रास्ना।असि।अदितिः।ते।बिलम्।गृभ्णातु।।मे।।९।।कृत्वाय।सा।
महीम्।उखाम्।मृन्मयीमिति मृत्ऽमयीम्।योनिम्।अग्नये।पुत्रेभ्यः।प्र।अयच्छत्।
अदितिः।श्रपयान्।इति।।खं।।१०।।वसवः।त्वा।धूपयंतु।गायत्रेण।छंदसा।अंगिर

स्वत्।रुद्राः।त्रैष्टुभेन।त्रैस्तुभेनेति त्रैस्तुभेन।आदित्याः।जागतेन।विश्वे।त्वा।देवाः।वै
श्वानराः।धूपयंतु।आनुष्टुभेन।आनुस्तुभेनेत्यानुऽस्तुभेन।छंदसा।अंगिरस्वत्।
इंद्रः।वरुणः।विष्णुः।त्वा।धूपयतु।।प्रीः।।११।।छ।। ।।अदितिः।त्वा।देवी।विश्वदेव्यव
ती।विश्वदेव्यवतीति विश्वदेव्यऽवती।पृथिव्याः।सधस्थ इति सधऽस्थे।अंगि
रस्वत्।खनतु।अवट।।श्छौ।।१।।देवानाम्।त्वा।पत्नीः।देवीः।विश्वदेव्यावतीः।विश्व
देव्यवतीरिति विश्वदेव्यऽवतीः।पृथिव्याः।सधस्थ इति सधऽस्थे।अंगिरस्वत्।द
धतु।उखे।धिषणाः।अमि।इंधताम्।वरूत्रीः।श्रपयंतु।ग्नाः।पचंतु।जनयः।अछिन्न
पत्रा इत्यछिन्नऽपत्राः।द्रौं।।२।।मित्रस्य।चर्षणीधृतः।चर्षणिधृत इति चर्षणिऽधृ
तः।अवः।देवस्य।सानसि।द्युम्नम्।चित्रश्रवस्तममिति चित्रश्रवःऽतमम्।जे।।३।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवः। त्वा। सविता। उत्। वपतु। सुपाणिरिति सुऽपाणिः। स्वङ्गुरिरिति सुऽअङ्गुरिः। सुबाहुरि
ति सुऽबाहुः। उत। शक्त्या॥ अव्यथमाना। पृथिव्याम्। आशाः। दिशः। आ। पृण॥ द्रं॥४॥
उत्थाय। बृहती। भव। उत। ऊँ इँ स्थाँ। तिष्ठ। ध्रुवा। त्वम्॥ मित्र। एताम्। ते। उख्याम्। परि। ददा
मि। अभित्यै। एषा। मा। भेदि॥ वसवः। त्वा। आ। छृन्दन्तु॥ किः॥५॥ छं॥ ॥आकूतिमित्याऽ
॥१५॥ कूतिम्। अग्निम्। प्रयुजमिति प्रऽयुजम्। स्वाहा॥ मनः। मेधाम्। चित्तम्। विज्ञातमिति ॥१५॥
विऽज्ञातम्। वाचः। विधृतिमिति विऽधृतिम्। अग्निम्। प्रयुजमिति प्रऽयुजम्। स्वाहा।
प्रजापतय इति प्रजाऽपतये। मनवे। अग्नये। वैश्वानराय। रैं॥१॥ विश्वो देवस्य॥
ईतः॥ रामा। सुमित्र्याः। मा। सुरिषः। अम्बी। धृष्णु। वीरयस्व। अग्निः। च। इदम्। करिष्य
थः। हुं॥ आ। दृंहस्व। देवि। पृथिवि। स्वस्तये। आसुरी। माया। स्वधया। कृता। असि। जुष्टम्।

देवेभ्यः। इदम्। अस्तु। हव्यम्। अरिष्टा। त्वम्। उत्। इहि। यज्ञे। अस्मिन्॥ त्यः॥४॥ द्रुन्न इति द्रु
ऽअन्नः। सर्पिरासुतिरिति सर्पिःऽआसुतिः। प्रत्नः। होता। वरेण्यः॥ सहसः। पुत्रः। अद्भुतः॥
॥प्नो॥५॥ परस्याः। अधि। संवत इति सम्ऽवतः। अवरान्। अभि। आ। तर॥ यत्र। अहम्।
अस्मि। तान्। अव॥ क्लिं॥६॥ परमस्याः। परावत इति पराऽवतः। रोहिदश्व इति रोहितऽअश्वः।
इह। आ। गहि। पुरीष्यः। पुरुप्रिय इति पुरुऽप्रियः। अग्ने। त्वम्। तर। मृधः॥ द्रिः॥७॥ यत्।
अग्ने। कानि। कानि। चित्। आ। ते। दारूणि। दध्मसि॥ सर्वम्। तत्। अस्तु। ते। घृतम्। तत्।
जुषस्व। यविष्ठ्य॥ रिं॥८॥ यत्। अत्ति। उपजिह्विकेत्युपऽजिह्विका। यत्। वम्रः। अतिस
र्पतीत्यतिऽसर्पति। सर्वम्। तत्। अस्तु। ते। घृतम्। तत्। जुषस्व। यविष्ठ्य॥ चुं॥९॥ अहरह
रित्यहःऽअहः। अप्रयावमित्यप्रऽयावम्। भरन्तः। अश्वायेवेत्यश्वायऽइव। तिष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते। घासमूं। अस्मै। रायः। पोषेण। इषाम्। अदंतः। अग्ने। मा। ते। प्रतिवेशा इति प्रतिऽवेशाः। रिषाम्।
॥ त्रैं॥ १०॥ नाभा। पृथिव्याः। समिधानमिति समऽइधाने। अग्नौ। रायः। पोषाय। बृहते। हवा
महे॥ इरम्मदमितीरम्ऽमदम्। बृहदुक्थमिति बृहतऽउक्थम्। यजत्रम्। जेतारम्। अ
ग्निम्। पृतनासु। सासहिम्। ससहिमिति ससहिम्॥ पुं॥ ११॥ याः। सेनाः। अभीत्वरी
१६ रित्यभिऽइत्वरीः। आव्याधिनीरित्याऽव्याधिनीः। उगणाः। उत। ये। स्तेनाः। ये। च। तस्क १६
राः। तान्। ते। अग्ने। अपि। दधामि। आस्ये॥ ध्रैं॥ १२॥ दंष्ट्राभ्याम्। मलिम्लून्। जं
भ्यैः। तस्करान्। उत। हनुभ्यामिति हनुऽभ्याम्। स्तेनान्। भगवइति भगऽवः। तान्।
त्वम्। खाद। सुखादितानिति सुऽखादितान्॥ ङ्ठिं॥ १३॥ ये। जनेषु। मलिम्लवः। स्तेनो
सः। तस्कराः। वने। ये। कक्षेषु। अघायवः। अघयवइत्यघऽयवः। तान्। ते। दधामि। जंभयोः॥

॥ ङ्वी॥ १४॥ यः। अस्मभ्यम्। अरातीयात्। अरातियादित्यरातिऽयात्। यः। च। नः। द्वेषते।
जनः॥ निंदात्। यः। अस्मान्। धिप्सात्। च। सर्वम्। तम्। मस्मसा। कुरु॥ ङ्घैं॥ १५॥ स
ꣳशितमिति सम्ऽशितम्। मे। ब्रह्म। सꣳशितमिति सम्ऽशितम्। वीर्यम्। बलम्॥
सꣳशितमिति सम्ऽशितम्। क्षत्रम्। जिष्णु। यस्य। अहम्। अस्मि। पुरोहितइति पुरःऽ
हितः॥ थी॥ १६॥ उत्। एषाम्। बाहूइति बाहू। अतिरम्। उत्। वर्चः। अथोइत्यथो। बल
म्। क्षिणोमि। ब्रह्मणा। अमित्रान्। उत्। नयामि। स्वान्। अहम्॥ चूं॥ १७॥ अन्नप
तइत्यन्नऽपते। अन्नस्य। नः। देहि। अनमीवस्य। शुष्मिणः॥ प्रप्रेति प्रऽप्र। दातारं
म्। तारिषः। ऊर्जम्। नः। धेहि। द्विपदइति द्विऽपदे। चतुष्पदे। चतुःपदइति चतुःऽपदे॥ वि
श्वकर्म्मणइति विश्वऽकर्म्मणे। स्वाहा॥ प्रैं॥ १८॥ पुनरिति पुनः। त्वा। आदित्याः। रुद्राः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसवः।सम्।इद्धम्।घृताम्।पुनः।ब्रह्मणः।वसुनीथेति वसुऽनीथा।यज्ञैः।घृतेन।त्वम्।
तन्वम्।वर्द्धयस्व।सत्याः।संतु।यजमानस्य।कामाः।स्वाहा॥झ्रः॥१९॥छि॥ ॥यु
ञ्जानेकां॥११॥प्रतूर्त्तं वाजि॥१६॥देवस्य त्वा॥१०॥अपो देवी॥१३॥आपो ह्ये॥११॥
अदितिष्ट्वा॥५॥आकूतिमे॥१९॥ ॥सप्तानुवाकेषु पञ्चा त्रीणि॥युंजानम्प्रे जाता
१७ न्पंचाशीति॥८५॥२॥इति द्वितीयो दशकः द्वितीयोऽध्यायः॥[illegible]॥ॐ मूः॥दृशानः। ।१७
रुक्मः।उर्व्या।वि।अद्यौत्।दुर्मर्षमिति दुःऽमर्षम्।आयुः।श्रिये।रुचानः।अ
ग्निः।अमृतः।अभवत्।वयोभिरिति वयःऽभिः।यत्।एनम्।द्यौः।अजनयत्।
सुरेता इति सुऽरेताः॥रीं॥१॥नक्तोषासा।नक्तोषसेति नक्तोषसा।समनसेति सऽ
मनसा।विरूपे इति विऽरूपे।धापयेते इति धापयेते।शिशुम्।एकम्।समीची इ

ति सम्ऽईची॥द्यावाक्षामा।रुक्मः।अंतः।वि।भाति।देवाः।अग्निम्।धारयन्।द्रवि
णोदा इति द्रविणःऽदाः॥ईं॥२॥विश्वा।रूपाणि।प्रति।मुञ्चते।कविः।प्र।असावीत्।
भद्रम्।द्विपद इति द्विऽपदे।चतुष्पदे।चतुःपद इति चतुःऽपदे॥वि।नाकम्।अख्य
त्।सविता।वरेण्यः।अनु।प्रयाणम्।प्रयानमिति प्रऽयानम्।उषसः।वि।राजति॥
॥टः॥३॥सुपर्ण इति सुऽपर्णः।असि।गरुत्मान्।त्रिवृदिति त्रिऽवृत्।ते।शिरः।गायत्र
म्।चक्षुः।बृहद्रथंतरे इति बृहत्ऽरथंतरे।पक्षौ॥ढ्यं॥४॥स्तोमः।आत्मा।छंदांसि।
अङ्गानि।यजूंषि।नाम।साम।ते।तनूः।वामदेव्यमिति वामऽदेव्यम्।यज्ञाय
ज्ञियमिति यज्ञाऽयज्ञियम्।पुच्छम्।धिष्ण्याः।शफाः॥झुं॥५॥सुपर्ण इति सुऽप
र्णः।असि।गरुत्मान्।दिवम्।गच्छ।स्वरिति स्वः।पत।विष्णोः।क्रमः।असि।सप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्नहेति सपत्नऽहा। गायत्रम्। छंदः। आ। रोह। पृथिवीम्। अनु। वि। क्रमस्व। अभिमातिहेत्य
भिमातिऽहा। त्रैष्टुभम्। त्रैस्तुभमिति त्रैस्तुभम्। अंतरिक्षम्। अरातीयतः। अरातियत
इत्यरातिऽयतः। हंता। जागतम्। दिवम्। शत्रूयतः। शत्रूयत इति शत्रुऽयतः। हंता। आनु
१८ ष्टुभम्। आनुस्तुभमित्यानुऽस्तुभम्। छंदः। आ। रोह। दिशः। अनु। वि। क्रमस्व। द्विं॥८॥द्ध॥
अक्रंदत्। अग्निः। स्तनयन्निवेति स्तनयन्ऽइव। द्यौः। क्षामा। रेरिहत्। वीरुधः। समं १८
ऽअन्निति सम्ऽअंजन्। सद्यः। जज्ञानः। वि। हि। ईम्। इद्धः। अख्यत्। आ। रोदसीइ
ति रोदसी। भानुना। भाति। अंतरिस्यंतः॥ थूं॥७॥ अग्ने। अभ्यावर्त्तिन्नित्यभिऽ
आवर्त्तिन्। अभि। मा। नि। वर्त्तस्व। आयुषा। वर्चसा। प्रजयेति प्रऽजया। धने
ना। सन्या। मेधया। रय्या। पोषेण॥ धुं॥८॥ अग्ने। अंगिरः। शतम्। ते। संतु। आवृत

इत्याऽवृतः। सहस्रम्। ते। उपावृत इत्युपऽआवृतः॥ अधा। पोषस्य। पोषेण। पुनः। नः।
नष्टम्। आ। कृधि। पुनः। नः। रयिम्। आ। कृधि॥ धिः॥९॥ पुनः। ऊर्जा। नि। वर्त्तस्व।
पुनः। अग्ने। इषा। आयुषा। पुनः। नः। पाहि। अंहसः॥ लिं॥१०॥ सह। रय्या। नि।
वर्त्तस्व। अग्ने। पिन्वस्व। धारया॥ विश्वप्स्न्येति विश्वऽप्स्न्या। विश्वतः। प
रि॥ कं॥११॥ आ। त्वा। अहार्षम्। अंतः। अभूः। ध्रुवः। तिष्ठ। अविचाचलिरित्यविऽ
चाचलिः॥ विशः। त्वा। सर्वाः। वांछंतु। मा। त्वत्। राष्ट्रम्। अधि। भ्रशत्॥ क्रें॥१२॥
उत्। उत्तममित्युत्ऽतमम्। वरुण। पाशम्। अस्मत्। अव। अधमम्। वि। मध्यम
म्। श्रथाय। श्रथयेति श्रथय॥ अथ। वयम्। आदित्य। व्रते। तव। अनागसः। अ
दितये। स्याम॥ चों॥१३॥ अग्ने। बृहन्। उषसाम्। ऊर्ध्वः। अस्थात्। निर्जगन्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नितिनिःऽजगन्वान्।तमसः।ज्योतिषा।आ।अगात्॥अग्निः।भानुना।रुशता।स्वङ्ग इति
सुऽअङ्गः।आ।जातः।विश्वा।सद्मानि।अप्राः॥ ज्ञौं॥१४॥ हꣳसः।शुचिषत्॥ईत
०॥सा॥ १५॥सीद।त्वम्।मातुः।अस्याः।उपस्थ इत्युपऽस्थे।विश्वानि।अग्ने।वयु
नानि।विद्वान्।मा।एनाम्।तपसा।मा।अर्चिषा।अभि।शोचीः।अन्तः।अस्याम्। ॥१९॥
॥१९॥ शुक्रज्योतिरिति शुक्रऽज्योतिः।वि।भाहि॥स्या॥१६॥अन्तः।अग्ने।रुचा।त्वम्।
उखायाः।सदने।स्वे॥तस्याः।त्वम्।हरसा।तपन्।जातवेद इति जातऽवेदः।शि
वः।भव॥ ङ्गं॥१७॥ शिवः।भूत्वा।मह्यम्।अग्ने।अथो इत्यथो।सीद।शिंदां।शि
वः।त्वम्।शिवाः।कृत्वा।दिशः।सर्वाः।स्वम्।योनिम्।इह।आ।असदः॥ क्रें॥१८॥
र्षं॥ ॥दिवः।परि।प्रथमम्।जज्ञे।अग्निः।अस्मत्।द्वितीयम्।परि।जातवेदाः

इति जातऽवेदाः॥तृतीयम्।अप्स्वित्यप्ऽसु।नृमणाः।नृमणा इति नृऽमनाः।अज
स्रम्।इन्धानः।एनम्।जरते।स्वाधीरिति सुऽआधीः॥ त्रैं॥१॥ विद्म।ते।अग्ने।त्रेधा।
त्रयाणि।विद्म।ते।धाम।विभृतेति विऽभृता।पुरुत्रेति पुरुऽत्रा॥विद्म।ते।नाम।परम्।
गुहा।यत्।विद्म।तम्।उत्सम्।यतः।आजगन्थेत्याऽजगन्थ॥ टाः॥२॥ समुद्रे।त्वा।नृम
णाः।नृमणा इति नृऽमनाः।अप्स्वित्यप्ऽसु।अन्तः।नृचक्षा इति नृऽचक्षाः।ईधे।दिवः।
अग्ने।ऊधन्।तृतीये।त्वा।रजसि।तस्थिवांसमिति तस्थिऽवांसम्।अपाम्।उ
पस्थ इत्युपऽस्थे।महिषाः।अवर्द्धन्॥ म्लीं॥३॥ अक्रन्दत्।अग्निः॥ईत०॥सा॥४॥ श्रीणा
म्।उदार इत्युत्ऽआरः।धरुणः।रयीणाम्।मनीषाणाम्।प्रार्प्पण इति प्रऽअर्प्पणः।
सोमगोपा इति सोमऽगोपाः॥वसुः।सूनुः।सहसः।अप्स्वित्यप्ऽसु।राजा।वि।भाति।अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्ने। उष सोम। इध्यानः॥ द्रैं॥ ५॥ विश्वस्य। केतुः। भुवनस्य। गर्भः। आ। रोदसी इति रोद
सी। अपृणात्। जायमानः॥ वीळुम्। चित्। अद्रिम्। अभिनत्। परायन्निति पराऽयन्।
जनाः। यत्। अग्निम्। अयजंत। पंच॥ झं॥ उशिक्। पावकः। अरतिः। सुमेधा इ
ति सुऽमेधाः। मर्तेषु। अग्निः। अमृतः। नि। धायि। इयर्ति। धूमम्। अरुषम्। भरि
॥२०॥ भ्रत्। उत्। शुक्रेण। शोचिषा। द्याम्। इनक्षन्॥ झं॥ ७॥ दृशानो रुक्मः॥ ईतः॥ पा॥ ८॥ ॥२०॥
यः। ति। अद्य। कृणवत्। भद्रशोच इति भद्रऽशोचे। अपूपम्। देव। घृतवंतमिति घृतऽवं
तम्। अग्ने। प्र। तम्। नय। प्रतरमिति प्रऽतरम्। वस्यः। अच्छ। अभि। सुम्नम्। दे
वभक्तमिति देवऽभक्तम्। यविष्ठ॥ धों॥ ९॥ आ। तम्। भज। सौश्रवसेषु। अग्ने। उ
क्थऽउक्थ इत्युक्थेऽउक्थे। आ। भज। शस्यमाने॥ प्रियः। सूर्ये। प्रियः। अग्ना। भ

वाति। उत्। जातेन। भिनदत्। उत्। जनित्वैरिति जनिऽत्वैः॥ जों॥ १०॥ त्वाम्। अग्ने। यजमा
नाः। अनु। द्यून्। विश्वा। वसु। दधिरे। वार्याणि॥ त्वया। सह। द्रविणम्। इच्छमानाः।
व्रजम्। गोमंतमिति गोऽमंतम्। उशिजः। वि। वव्रुः॥ घों॥ ११॥ अस्तावि। अग्निः।
नराम्। सुशेव इति सुऽशेवः। वैश्वानरः। ऋषि[illegible]भिरिति ऋषिऽभिः। सोमगोपा
इति सोमऽगोपाः॥ अद्वेषे इत्यद्वेषे। द्यावापृथिवी इति द्यावापृथिवी। हुवेम। देवाः।
धत्त। रयिम्। अस्मे इत्यस्मे। सुवीरमिति सुऽवीरम्॥ त्रं॥ १२॥ ७॥ ॥ समिधा। अग्नि
म्॥ ईतः॥ आ॥ १॥ उत्। उ इत्यूं। त्वा। विश्वे। देवाः। अग्ने। भरंतु। चित्तिभिरिति चित्तिऽ
भिः॥ सः। नः। भव। शिवः। त्वम्। सुप्रतीक इति सुऽप्रतीकः। विभावसुरिति विभाऽ
वसुः॥ श्रृं॥ २॥ प्र। इत्। अग्ने। ज्योतिष्मान्। याहि। शिवेभिः। अर्चिभिरित्यर्चिऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिः। त्वम्॥ बृहद्भिरिति बृहत्ऽभिः। भानुभिरिति भानुऽभिः। भासन्। मा। हिंसीः। तन्वा।
प्रजा इति प्रऽजाः॥ क्रुं॥ ३॥ अक्रंदत्। अग्निः॥ ई तः॥ प॥ ४॥ वप्रेति वप्रऽप्रा। अयम्। अग्निः। पु
रुतस्य। शू एवा। वियता। सूर्यः। न। रोचते। बृहत्। भाः॥ अभि। यः। पूरुम्। पृतनासु।
२९ तस्थौ॥ दीदाय। दैव्यः। अतिथिः। शिवः। नः॥ गिः॥ ५॥ आपः। देवीः। प्रति। गृभ्णीत। २९
भस्म। एतत्। स्योने। कृणुध्वम्। सुरभौ। उं इ। स्यूं। लोके॥ तस्मै। नमंताम्। जनयः।
सुपत्नीरिति सुऽपत्नीः। मातेवेति माताऽइव। पुत्रम्। बिभृत। अप्स्वित्यप्ऽसु। एनत्॥
॥ ध्यः॥ ६॥ अप्स्वित्यप्ऽसु। अग्ने। सधिः। तव। सः। ओषधीः। अनु। रुध्यसे। गर्भे।
सन्। जायसे। पुनरिति पुनः॥ ध्रिं॥ ७॥ गर्भः। असि। ओषधीनाम्। गर्भः। वनस्प
तीनाम्। गर्भः। विश्वस्य। भूतस्य। अग्ने। गर्भः। अपाम्। असि॥ हिं॥ ८॥ प्रस

ह्येति प्रऽसह्य। भस्मना। योनिम्। अपः। च। पृथिवीम्। अग्ने॥ संसृज्येति सम्ऽ
सृज्य। मातृभिरिति मातृऽभिः। त्वम्। ज्योतिष्मान्। पुनः। आ। असदः॥ युं॥ ९॥ पु
नः। आसद्येत्याऽसद्य। सदनम्। अपः। च। पृथिवीम्। अग्ने। शेषे। मातुः। यथा। उपस्थ
इत्युपऽस्थे। अंतः। अस्याम्। शिवतम इति शिवऽतमः॥ णं॥ १०॥ पुनरूर्जा॥ ई तः॥ से॥
॥ ११॥ सहरय्या॥ ई तः॥ व॥ १२॥ बोधा। मे। अस्य। वचसः। यविष्ठ। मंहिष्ठस्य। प्र
भृतस्येति प्रऽभृतस्य। स्वधाव इति स्वधाऽवः॥ पीयति। त्वः। अनु। त्वः। गृणाति।
वंदारुः। ते। तन्वम्। वंदे। अग्ने॥ ग्नें॥ १३॥ सः। बोधि। सूरिः। मघवेति मघऽवा। व
सुपत इति वसुऽपते। वसुदावन्निति वसुऽदावन्॥ युयोधि। अस्मत्। द्वेषांसि॥ द्वे॥ १४॥
पुनस्त्वा॥ ई तः॥ अ॥ १५॥ ॐ॥ ॥ अपाऽइता। विऽइता। वि। च। सर्पत। अतः। ये। अत्र। स्थ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुराणाः। ये। च। नूतनाः॥ अदात्। यमः। अवसानमित्यवऽसानम्। पृथिव्याः। अक्रन्। इम
म्। पितरः। लोकम्। अस्मै॥ त्र्ययुः॥१॥ संज्ञानमिति सम्ऽज्ञानम्। असि। कामधरणमि
ति कामऽधरणम्। मयि। ते। कामधरणमिति कामऽधरणम्। भूयात्। अग्नेः। भस्म। अ
सि। अग्नेः। पुरीषम्। असि॥ चितः। स्थ। परिचित इति परिऽचितः। ऊर्ध्वचित इत्यूर्ध्वऽ
२२ चितः। श्रयध्वम्॥ मो॥२॥ अयम्। सः। अग्निः। यस्मिन्। सोमम्। इन्द्रः। सुतम्। दधे। ज २२
ठरे। वावशानः॥ सहस्रियम्। वाजम्। अत्यम्। न। सप्तिम्। ससवानिति ससऽवा
न्। सन्। स्तूयसे। जातवेद इति जातऽवेदः॥ श्रौं॥३॥ अग्ने। यत्। ते। दिवि। वर्चः। पृ
थिव्याम्। यत्। ओषधीषु। अप्स्वित्यप्ऽसु। आ। यजत्र॥ येन। अन्तरिक्षम्। उरु।
आततन्थेत्याऽततन्थ। त्वेषः। सः। भानुः। अर्णवः। नृचक्षा इति नृऽचक्षाः॥ द्व॥४॥ अ

ग्ने। दिवः। अर्णम्। अच्छ। जिगासि। अच्छ। देवान्। ऊचिषे। धिष्ण्याः। ये॥ याः। रोचने।
परस्तात्। सूर्यस्य। याः। च। अवस्तात्। उपतिष्ठन्त इत्युपऽतिष्ठन्ते। आपः॥ इज्यौ॥५॥
पुरीष्यासः। अग्नयः। प्रावणेभिः। प्रवणेभिरिति प्रऽवणेभिः। सजोषस इति सऽ
जोषसः॥ जुषन्ताम्। यज्ञम्। अद्रुहः। अनमीवाः। इषः। महीः॥ प्रां॥६॥ इडाम्। अ
ग्ने। पुरुदंसमिति पुरुऽदंसम्। सनिम्। गोः। शश्वत्तममिति शश्वत्ऽतमम्।
हवमानाय। साध॥ स्यात्। नः। सूनुः। तनयः। विजावेति विऽजावा। अग्ने। सा। ते। सु
